अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

पंचदशवर्षे तृतीयोऽङ्कः

१५ जुलाई १९९३

प्रधानसम्पादकः
डा० रमाकान्त शुक्लः
एम० ए०, पीएच० डी०, साहित्याचार्यः
सांख्ययोगाचार्यः

गा ... ाधि
नो मु ... श्च तत्र
वत् ... ति कृत्वा
क्यन्ते स्थानाभावात्।
द्रणस्खलितानां कृते
विदुषामाश्रवः
(... मान्त शुक्लः)
सम्पादकः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११००५९

देववाणी - परिषद्वार्ता

देववाणी - परिषदोऽष्टादशतमः संकल्पनादिवसः

'देववाणी - परिषद्, दिल्ली' त्येतस्याः संस्थाया अष्टादशतमः संकल्पनादिवसः नवदिल्ल्यां वाणी-विहारे 'वाणी पब्लिक स्कूल' इत्यत्र २१-८-१९९३ तारिकायां सोत्साहं सम्मानितोऽभूत्।

उत्सवस्य मुख्यातिथित्वं थाईलैण्डस्थशिल्पाकरविश्वविद्यालयतः १९-७-१९९३ ई० तारिकायां लब्ध- डी० लिट्०- सम्मानैः विश्वविश्रुतविद्वद्भिः डा० सत्यव्रतशास्त्रिभिः किञ्चाध्यक्ष्यं राष्ट्रीयसंग्रहालयस्य महानिदेशकैः किञ्च राष्ट्रीयसंग्रहालयसंस्थानस्य कुलपतिभिः डा० रमेशचन्द्रशर्मभिः कृतम् । तैः अर्वाचीनसंस्कृतसाहित्यप्रदर्शनी अप्युद्घाटिता यत्र ५०० ग्रन्थाः प्रादर्श्यन्त। अस्मिन्नवसरे श्रीलालबहादुरशास्त्री-राष्ट्रिय संस्कृतविद्यापीठ - शिक्षासंकायप्रमुखैः डा० श्रीधरवासिष्ठैः संस्कृतामृत - सम्पादकैः प्रभाकररामरत्नशास्त्रिभिः, दिल्लीसंस्कृताकादमीसचिवैः श्रीकृष्णसेमवालैरन्यान्यैश्च वक्तृभिः संस्कृतस्य प्रचारप्रसारार्थं समुचितप्रयासानामावश्यकतानुभूता। परिषन्महासचिवेन डा० रमाकान्तशुक्लेन निगदितं यत्कक्षासु संस्कृतमध्येतुमवसरमलभमानानां छात्राणां कृते संस्कृताध्ययनस्य प्रबन्धं कर्तुं स्वयंसेविसंस्थाभिर्यतनीयम्।

अवसरेऽस्मिन् परिषद आद्याध्यक्षा आचार्यरमेशचन्द्रशुक्लाः, पूर्वाध्यक्षाः किञ्च भारतराष्ट्रपतिसम्मानिता आचार्यवेदानन्दझामहाभागाः नैके संस्कृतसाहित्यकाराः, पत्रकाराः, प्रचारका अक्षरयोजकाश्च परिषदा समभिनन्दिताः।

दिल्लीविश्वविद्यालयस्य श्यामाप्रसादमुखर्जीमहाविद्यालयस्य संगीतविभागाध्यक्षाणां डा० अविनाशशर्मणां निर्देशने कु० ऋतु शर्मा - कु० सिमरत - कु० निधि - कु० मीनू- प्रभृतिभिः डा० रमाकान्तशुक्लस्य 'सुरभारती विजयते' तथा अन्या रचनाः ससंगीतं प्रस्तुताः। श्रीपृथ्वीश्वरगायनेन तबलावादनं कृतम् । वाणी पब्लिक स्कूल- विद्यार्थिभिः **'भाति मे भारतम्'** साभिनयं प्रस्तुतम् । सीमा माडल स्कूल - संजीवनी पब्लिक स्कूल- श्वेता पब्लिक स्कूल - मोतीनाथ संस्कृत महाविद्यालयानां छात्रैश्छात्राभिश्च विविधाः संस्कृतकार्यक्रमाः प्रस्तुताः । कविरत्नओम्प्रकाशठाकुर - श्री किमोठी - डा० रमेशचन्द्र शर्मादिभिः संस्कृतकविता अपि पठिताः। धन्यवादज्ञापनं डा० शशिप्रभा कुमार - महाभागया कृतम्। उत्सवेऽस्मिन् डा० उषा सत्यव्रत- डा० वेदवती वैदिक - डा० राम सुरेश पाण्डेय - प्रभृतयो नैके विश्वविद्यालयप्रवाचकाः, शतशः संस्कृतानुरागिणो, नागरिकाश्च समुपातिष्ठन्।

(रमा शुक्ला)

संस्कृतजगद्वार्ताः ४७ तमे पृष्ठे द्रष्टव्याः

अर्वाचीनसंस्कृतसाहित्यसर्वेक्षणम्

(१९९०-९३)

त्रिनवत्युत्तरैकोनविंशतिशततमेशवीयेऽब्दे मईमासस्य
अष्टाविंशतः त्रिंशत्तमं दिनांकं यावत्
पुण्यपत्तनस्थे भाण्डारकरप्राच्यसंशोधनसंस्थाने आयोजिते
अखिलभारतीयप्राच्यविद्यासम्मेलनषट्त्रिंशत्तमाधिवेशने

साहित्यिकसंस्कृतानुभागस्य

अध्यक्षीयं भाषणम्

भाषणकर्त्ता

डा0 रमाकान्त शुक्ल:

एम.ए. (हिन्दी-संस्कृतयो), साहित्याचार्य:, सांख्ययोगाचार्यः, पीएच. डी.
दिल्लीविश्वविद्यालयस्य राजधानीकालेजे हिन्दीं-विभागे रीडर:
प्रधानसम्पादक: 'अर्वाचीनसंस्कृतम्' नयी दिल्ली
आर-6, वाणी विहारः, नयी दिल्ली-110059

PRESIDENTIAL ADDRESS OF THE CLASSICAL SANSKRIT SECTION OF A.I.O.C. 36TH SESSION B.O.R.I., PUNE

(28-30.5.1993)

by

Dr. RAMA KANT SHUKLA
R-6, VANI VIHAR, NEW DELHI-110059 (INDIA)

।।श्रीसरस्वत्यै नमः।।

अ० भा० प्राच्यविद्यासम्मेलनस्य षट्त्रिंशत्तमाधिवेशनस्य मुख्यातिथयः मान्याः आचार्य-डेनियल एच.एंच. इंगल्स-महाभागाः, महाध्यक्षा डा० प्रभाकरनारायणकवढेकराः, प्राच्यविद्यावदाताः प्रो. रामचन्द्रनारायणदाण्डेकराः, नानादिग्देशागताः सारस्वततपःपूतान्तरात्मानो विद्वांसो, विदुष्यः, प्रेयांसः शोधकर्तारश्च,

अखिलभारतीयप्राच्यविद्यासम्मेलनस्य षट्त्रिंशत्तमाधिवेशनस्य **'साहित्यिक (क्लासिकल) संस्कृता'**नुभागस्यं महनीयेऽध्यक्षपदे भवद्भिर्लम्भितोऽयं जनः सर्वप्रथमं पूर्वाध्यक्षेभ्यो नमोवाकं प्रशास्ते तदनु च सर्वेभ्योऽप्यत्र समागतेभ्यो विद्याव्रतिभ्यः स्वागतं व्याहरति।

अथानन्तरं विगतवर्षत्रयान्तराले साहित्यिकसंस्कृतमलम्ब्य यदनुसन्धानं, समीक्षणं, सर्वेक्षणादिकं च जातम् यच्च नवीनरचनानां प्रणयनं जातं याश्च संस्कृतसाहित्यजगति स्मरणीया घटना जातास्तद्विषये सर्वेक्षणात्मकं यथाशक्ति किंचिंन्निवेदयितुमीहते।

'क्लासिकल' पदस्य संस्कृतपर्यायार्थं मया **'साहित्यिक'** पदं प्रयुज्यते। यद्यप्येतत्कृते पूर्वसूरिभिः 'श्रेण्य' - 'अभिजाता' दिपदानि प्रयुज्यन्ते तथापि सहजावबोधार्थं मया 'क्लासिकल' संस्कृतस्यार्थे साहित्यिकसंस्कृतमिति पदं प्रस्तूयते। साहित्यिकसंस्कृते हि रामायण - महाभारत - पुराण - नाटक -काव्यादीन्यन्तर्भवन्ति यत्र रचनाकर्तुः साधना कम्पपि लोकोत्तरमानन्दं निदधाति। अयमानन्दः 'रस' इति पदेन काव्यशास्त्रिभिः परिभाष्यते। अयमेव च काव्यस्य प्राणत्वेन स्वीक्रियते मनीषिभिः। रसदशामाप्ता जना पुण्यवन्तो भवन्ति *'पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्।'*

अद्य त्रिनवत्युत्तरैकोनविंशतिशततमेशवीयेऽब्दे मईमासस्य अष्टाविंशतारिकायां पुण्यनगरे यदिदमधिवेशनं प्रारभते तस्य महन्महत्त्वं विद्यते। पुण्यनगरं हि न केवलमैतिहासिकदृशा अपितु सांस्कृतिक-साहित्यिकदृशापि नैजं वैशिष्ट्यं

पुष्णाति। सह्याद्रि-सुषमामण्डितस्य मूलामूठातरंगैर्लालितस्य पुण्नगरांचलस्य क्रोडे स्थित्वा कियन्तो देशभक्ताः स्वातन्त्र्यवीराः, विद्वांसः रचनाकाराश्च भारतभुवः सपर्यांचक्रुः, कुर्वन्ति च--इति नापोहितं प्रेक्षावताम्। छत्रपतिशिवाजि-लोकमान्यबालगंगाधरतिळक-गोखले-सावरकर-प्रभृतीनां तपस्याभिरियं पुण्यभूमिः पुण्यतरा राजते। सर्वश्रीरामकृष्णगोपालभाण्डारकर-अभ्यंकर-चित्रावशास्त्रि - दत्तोवामन पोतदार-परशुरामकृष्णगोडे-परशुरामलक्ष्मणवैद्य-रामचन्द्रनारायणदाण्डेकरप्रभृतीनां विश्वविश्रुतानां विदुषां कर्मभूमिरियं पुण्यभूमिः।[१]

संगीतकाराणां, नाट्यविशारदानां, फिल्मप्रशिक्षकाणां चेयं कर्मस्थली। अनया पुण्यनगर्या संस्कृतस्याध्यापने, संशोधने, कवने च रता विश्वविश्रुता नैके सरस्वतीसुताः समुत्पादिताः। अत्र हिं 'शारदा' प्रसीदति। अत्र हि शारदा - गौरव-ग्रन्थमालायां पं. वसन्त गाडगीळेन प्रसिद्धीकृताः शिवराज्योदयादयो नैके ग्रन्था विद्वत्समाजे चर्चाविषयीभूताः सन्ति। अत्रैव *'शतशतकोटिशरत्पर्यन्तं प्रवहताम् संस्कृतमन्दाकिनी'* ति गानमाविर्भूतम् यदद्यत्वे सम्पूर्णेऽपि जगति संस्कृतसमारोहेषु संस्कृतप्रणयिभिः सानन्दं गीयते।

अत्र हि सम्पूर्णसंसारस्य विद्वांसः समागत्य जटिलप्रश्नानामुत्तरं लभन्ते। अत्रैव 'अखिलभारतीयप्राच्यविद्यासम्मेलनस्य' जन्म जातम् यस्याद्यत्वे अमृतमहोत्सवः सम्मान्यते। अ.भा. प्राच्यविद्यासम्मेलनस्य कार्यालयं स्वक्रोडे दधानं 'भाण्डारकरप्राच्यशोधसंस्थानं' को न जानाति? विद्यावीराणां, युद्धवीराणां, साहित्यसंगीतकलामर्मज्ञानां प्रियेयं पुण्यभूमिः। यदापर्यन्तं देशवासिनः समर्थगुरुरामदासं, शिववीरं लोकमान्यबालगंगाधरतिळकं, यरवदावासिनं महात्मानं गान्धिनं च स्मरिष्यन्ति तदापर्यन्तमस्या भूमेश्चर्चा काव्येषु भविष्यत्येव। विदुषां साधनापीठत्वेनापीयं भूमिः संस्कृतसाहित्ये गीयत एव। 1977 तमेशवीयेऽब्दे प्रकाशितायां 'चारुचचरितचर्चायाम्' आचार्यरमेशचन्द्र-शुक्लैस्सादरं नूयते इयं पुण्यभूमिरित्थम्प्रकारेण-

सा पुण्यभूमिबर्हुवन्दनीया सभाजनीया ह्यभिनन्दनीया।
विद्योतते पण्डितवृन्दवन्द्यो दाण्डेकरो यत्र सुधीवरेण्यः॥[२]

अस्यामेव पुण्यभूमौ वयं संस्कृतसाहित्यस्य विगतवर्षत्रयव्यापिन्या

प्रगतियात्रायाः सिंहावलोकनं कर्तुं समेता इति धन्या वयं सर्वे। अहं तु प्रसिद्धामिमामुक्तिं स्मरामि-

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।

आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्।। इति

प्रेयांसो विद्वांसः,

संस्कृतसाहित्यं हि अनन्तपारम्। तस्य साकल्येनाध्ययनमेकेन जनेन एकस्मिन् जन्मनि कर्तुं नैव पार्यते। विश्वस्य मंगलार्थं वेदवाणी संस्कृते एवाविर्भूता। निषादविद्धाण्डजदर्शनोत्था आदिकवेर्वाल्मीकेः करुणा *'मा निषादे'* तिव्याजेनात्रैव प्रकटिता। देशस्य एकतामखण्डतां च संरक्षितुं मानवतां च पोषयितुं काले काले सहस्रशो हि काव्यनाटकाद्या रचनाः संस्कृतभाषायां विरचिता विरच्यन्ते च। काव्यं कर्तुं विचारयितुं च ये जानन्ति तेषामत्र महती परम्परा। अस्यामेव परम्परायां साम्प्रतिकाः संस्कृत-रचनाकाराः स्वयोगदानं कुर्वाणा देववाण्याः पुराणतारुण्यं प्रत्यग्रशोभां च सम्यक् ख्यापयन्तोऽस्मादृशां जनानां वन्दनीयतां यान्ति।

विगतत्रिषु वर्षेषु गुणपरिमाणदृष्ट्या पुष्कलं संस्कृतसाहित्यमस्मद्दृष्टिपथे समायातम्। तत्र नाटकानि, ध्वनिनाटकानि, महाकाव्यानि, खण्डकाव्यानि, पत्रकाव्यानि, गीतानि, मुक्तच्छन्दोरचनाः, कथाः, उपन्यासाः, काव्यसंकलनानि, स्फुटरचना अन्याश्च तास्ता विधाः संस्कृतसाहित्यस्य कोशं समृद्धं कुर्वाणा अवलोक्यन्ते। अत्रान्तरे बह्व्यो रचनाः प्रकाशिताः, दूरदर्शनाकाशवाणीतः प्रसारिताः, गोष्ठीषु पठिताः, समीक्षागोष्ठीषु विचारिताः किंच नैकाः प्रकाशनस्य प्रतीक्षां कुर्वाणास्तिष्ठन्ति। तासां विषयेऽत्र दिङ्मात्रचर्चामिव कर्तुमवसरो विद्यते। विस्तरेण तु तत्र शोधकर्तृभिरेव अध्ययनं करिष्यते।

प्रकाशिताः शोध-समीक्षाग्रन्थाः

आलोच्यकाले नैकेषु विश्वविद्यालयेषु तत्तद्भाषामाध्यमेन संस्कृत-साहित्यमवलम्ब्य विविधदृशा रचिताः शोधप्रबन्धाः शोधोपाध्यर्थं स्वीकृताः जाताः। संस्कृत-विश्वविद्यालयेषु संस्कृतमाध्यमेन शोधकार्यं कृतवतां विदुषां नास्ति संख्या न्यूना।

संस्कृतसाहित्य-शोध-समीक्षापरा अनेके ग्रन्था: प्रकाशिता: जाता: येषु डॉ. छोटेलालत्रिपाठिन: 'नवमशताब्दीतो द्वादशशताब्दीपर्यन्तं विशिष्टसंस्कृतकाव्येषु सामाजिकव्यवस्थाया: परिशीलनम्',[३] डॉ. नरेन्द्रनाथयादवस्य 'बीसवीं शताब्दी के संस्कृत-प्रहसनों का अध्ययन',[४] डॉ. कुमुद टण्डन-महाभागाया 'महात्मा गाँधी परक संस्कृत काव्य'[५], श्री ज्ञानचन्द्रशास्त्रिण: 'ध्वनिविरोधिन आचार्या:'[६], आचार्यकुवेरनाथशुक्लस्य 'योगवासिष्ठ के राम'[७], डॉ. के. सी. जैनस्य 'Kalidasa and his Times',[८] डा० रमेशकुमारपाण्डेयस्य 'भरतमुनि (साहित्यशास्त्र के आदि आचार्य)[९], सुषमास्नातिकाया: बृहत्त्रयी और लघुत्रयी पर वैदिक प्रभाव,'[१०] डॉ. कु. एस. के. शर्ममहाभागाया: 'Haravijaya of Ratnakara (A Criticism)[११], डॉ. तपस्वीनन्दिन: 'हैमवाङ्मयविमर्श:' [१२] डॉ. आशा सर्वटे-महाभागाया: 'डॉ. वेंकटराघवन् के नाट्य और काव्य का अनुशीलन',[१३] प्रभाकरदीक्षितस्य 'वाल्मीकिरामायण में. राजनीतिक विचार'[१४] रमाकान्तशुक्लस्य 'अर्वाचीनसंस्कृतसाहित्यपरिचय: (द्वितीय: खण्ड:)'[१५], डॉ. कृष्णकुमारस्य 'मेघदूतानुशीलनम्'[१६], प्रो. सत्यव्रतशास्त्रिण: 'Kalidasa in Modern Sanskrit Literature'[१७] डॉ. गिरधारीलालचतुर्वेदस्य 'Revisiting 'Sakuntalam (A commentary on Goethe's Sakuntalam Epigram)'[१८], डॉ. चन्द्रकान्तशुक्लस्य 'संस्कृत के दार्शनिक नाटकों का संविधानक तत्त्व'[१९], डॉ. कृष्णाशर्मा-महाभागाया: 'दृष्टान्तकलिकाशतकम्: एक समीक्षात्मक अनुशीलन',[२०], डॉ. सी. राजेन्द्रन्महाभागस्य 'A Study of Mahimabhatta's Vyaktiviveka'[२१], डॉ. लता सिंहल- महाभागाया'भारतीय संस्कृति में नारी'[२२] डॉ. निर्मल त्रिखाया: 'Faiths and Beliefs in the Kathasaritsagara'[२३], मधुसूदनपते: 'Sanskrit Drama, Essays in Revaluation',[२४] पं. रामनारायणमिश्रस्य 'श्रीमद्भागवत-गीतों का शास्त्रीय अनुशीलन'[२५], कु. बेलाहाण्डाया: 'प्रोफेसर रसिकविहारी जोशी द्वारा प्रणीत 'मोहभंगम्' महाकाव्य (एक परिशीलन)'[२६], इत्यादयो ग्रन्था: विपश्चितां शोध-समीक्षा-शेमुषीं द्योतयन्तो विलोक्यन्ते।

आचार्यपण्डितआद्याचरणझा-महाभागैः 'भारतीयवाङ्मयेषु रामकथावर्णनम्,[२७] इत्येद्ग्रन्थमालायां द्वितीयखण्डं प्रणीतम् यत्र कम्बरामायणस्य संस्कृतगद्यमयं रूपान्तरणं कृतम् किंच रघुवंश महावीरचरित-उत्तररामचरित-अनर्घराघव-कुन्दमालानाटकेतिपंच-कृतीनां संक्षिप्तसंस्कृतगद्यानुवादः समीक्षासहितः प्रस्तुतः। अस्य ग्रन्थस्य प्राग्वाचिकं तत्कालीनभारतोपराष्ट्रपतिना (अद्यत्वे च भारतस्य महामहिमराष्ट्रपतिना) डॉ. शंकरदयालशर्मणा लिखितम्। सरलसंस्कृतनिबद्धोऽयं ग्रन्थः एकत्रैव नैकेषां ग्रन्थानां सारं दधाति। तमिलभाषायाः कृतेः संस्कृतानुवादेन झामहाभागेन एकोऽरुन्तुदोऽभावः पूरितः।

डॉ. नगेन्द्र - सम्पादिते 'भारतीय महाकाव्य'[२८] इति ग्रन्थे लेखचतुष्टयं रामायणं,[२९] महाभारतं,[३०] रघुवंशं[३१] नैषधीयचरितं[३२] चाधारीकृत्य प्रकाशितम्।

अप्रकाशिताः शोधप्रबन्धाः

राष्ट्रियसंस्कृतसंस्थानस्य विविधेषु विद्यापीठेषु संस्कृत-भाषामाध्यमेन विद्यावाचस्पति (पीएच. डी.) शोधोपाधिं शतशः शोधार्थिनो लब्धवन्तः। (द्विनवत्युत्तरैकोनविंशतिशततमेशवीयेऽब्दे जनवरीमासस्य द्वितीयस्यास्तारिकाया 2.1.1992 अनन्तरं यैः शोधकर्तृभिः शोधोपाधिर्लब्धस्तेषां संक्षेपतोऽत्र चर्चां करोमि। सर्वश्रीवरप्रसादमूर्तिना 'रसिकरंजनीसंज्ञिकायाः कुवलयानन्दटीकायाः पाठसमीक्षात्मकं सम्पादनम्' इति, सुनीलकुमारशुक्लेन 'श्रीपादशास्त्रिहसूरकरकृत चारित्रिकग्रन्थानां विश्लेषणात्मकमध्ययनम्' इति, श्रीमत्या सुधारानीमहाभागया 'परिमलपद्मगुप्तविरचितस्य नवसाहसांकचरितस्य सांस्कृतिकमध्ययनम्' इति, कु. सरितया 'संस्कृतरामकाव्येषु श्रीहनुमच्चरितस्य तुलनात्मकमध्ययनम्' इति, श्रीमत्या मालतीद्विवेदी-महाभागया 'हर्षरचितप्रियदर्शिकाया रत्नावल्या सह तुलनात्मकमध्ययनम्' इति, कु. आरती अग्रवाल-महाभागया 'विश्वनाथ विद्यानाथविद्याधरीयकाव्यशास्त्रग्रन्थानां तुलनात्मकमध्ययनम्' इति, रामकुमारझामहाभागेन 'महाभारते राजनीतितत्त्वविमर्शः' इति, इतिश्रीरथेन 'श्रीमद्भागवतस्य शैक्षणिकानुशीलनम्' इति, श्रीमत्या सी. शान्तया 'केरलीयकविभी रचितानां संस्कृतबालकाव्यानां समीक्षापूर्वकं वासुदेवविरचितस्य श्रीगोविन्दचरितस्य समालोचनात्मकं सम्पादनमध्ययनं चे' ति,

क्षेमराजबरोलामहाभागेन 'चतुर्भाण्यां परिहास-व्यङ्ग्यानां परिशीलनम्' इति, के. साम्बशिवमूर्तिना 'उदण्डकविविरचितस्य मल्लिका-मारुतप्रकरणस्य पाठसमीक्षात्मकमध्ययनम्' इति, पी. शंकरराजेन 'वामनभट्टबाणकृत वेमभूपालचरितस्य विमर्शनात्मकमध्ययनम्' इति, ई.पी. श्रीदेव्या 'केरलीयकुड्डियाट्टनाट्यकलायाः समालोचनात्मकमध्ययनम्' इति, श्रीमत्या एन.के. लालनमहाभागया 'अलंकारसर्वस्वचित्रमीमांसयोस्तुलनात्मकमध्ययनम् 'इति, जितेन्द्रकुमारअग्रवालेन 'श्रीलक्ष्मणमाणिक्यदेवविरचितविख्यात-विनयनाटकस्य सम्पादनं समीक्षणं चे' ति, कृष्णकान्तपाण्डेयेन 'संस्कृतसाहित्ये भरतः' इति, कु. मंजुश्रीवास्तवया 'संस्कृतवाङ्मये नारदचरितस्य क्रमिकविकासः' इति, के.पी. केशवनमहाभागेन 'श्रीविश्वेश्वरपण्डितविरचितस्यालंकारकौस्तुभस्य समीक्षात्मकमध्ययनम्' इति, श्रीमत्या कामाक्षीशर्ममहाभागया 'कुवलयानन्द-चित्रामीमांसयोस्तुलनात्मकमध्ययनम्' इति, विजयकुमारशर्मणा 'काव्यप्रकाश विस्तारिकायाः समीक्षात्मकमध्ययनम्' इति, कु. रीताश्रीवास्तवमहाभागया 'भासकृतनाटकानां भाषावैज्ञानिकमध्ययनम्', इति, घूरनझामहाभागेन 'अलंकाराणां विषये मम्मटजगन्नाथयोः मतविमर्शः', इति, विजयशंकरओझामहाभागेन 'रुक्मिणीविजयमहाकाव्यस्य समीक्षात्मकमध्ययनम्' इति, राजकुमारमिश्रेण 'शब्दशक्तीनां काव्यशास्त्रीयसमीक्षात्मकमध्ययनम्' इति, रामकुमारदधीचेन 'श्रीनिवासशास्त्रिण उपन्यासेषु युगचेतना' इति, भूदेवप्रसादवर्मणा 'भिक्षाटनकाव्यस्य समालोचनात्मकमध्ययनम्' इति, श्रीमत्या कंचनश्रीवास्तवमहाभागया 'आनन्दराम-विरचितस्य विद्यापरिणयन-नाटकस्य आलोचनात्मकमध्ययनम्' इति, चन्द्रशेखरेण 'पण्डितराजकाव्यसंग्रहस्य साहित्यिकं परिशीलनम्' इति, सत्यनारायणआचार्येण 'ध्वन्यालोकलोचनव्याख्यानभूताया अंजनी-टीकायाः समीक्षात्मकं सम्पादनम्' इति, कु. दीपावर्ममहाभागया 'द्वादशशताब्दीय-संस्कृतनाटकेषु सामान्यलोकजीवनस्य चित्रणम्' इति, कु. ममतागुप्तया 'कुन्तकस्य वक्रोक्तिदिशा बृहत्त्रय्याः सविमर्शं विवेचनम्' इति, कृष्णकुमार त्रिपाठिना 'अश्वघोषस्य कृतीनां दार्शनिकमध्ययनम्' इति, गदाधरहोत्रा 'हरिभक्तिविलासस्य समीक्षात्मकमध्ययनम्' इति, श्रीप्रकाशरायेण 'रतिमन्मथ नाटकस्य समीक्षात्मकमध्ययनम्' इति, कृष्णदेवभार्गवेण 'संस्कृतसाहित्ये कविशिक्षापरम्परा तस्यां राजशेखरस्य योगदानम्' इति, श्रीमत्या

आराधनाश्रीवास्तवया 'अमरुशतकं तट्टीकायाश्च साहित्यिकं सांस्कृतिकंचाध्ययनम्' इति, कुंजबिहारी पण्ड्यामहाभगेन च 'श्रीवाग्वरश्रेत्रस्य संस्कृतसाहित्याय योगदान' मिति विषयमवलम्ब्य शोधोपाधिर्लब्धः।[३३]

अभिनन्देनग्रन्थाः

आलोच्यकाले संस्कृतसपर्यापराणां नैकेषां विदुषां रचनाकर्तॄणां च अभिनन्दनग्रन्था अपि प्राकाश्यं गता यत्र तेषां व्यक्तित्वस्य समुन्मीलनेन साकं तत्तद्विषयेषु वैदुष्यपरा लेखा अपि मुद्रिता जाताः। एषु लेखेषु नैके साहित्यिकसंस्कृतमवलम्ब्यापि निबद्धास्सन्ति। डॉ. प्रभाकरनारायण कवठेकराभिनन्दनग्रन्थः 'प्रभाकरनारायणश्रीः'[३४] इति शीर्षकेण सद्य एव प्रकाशितोऽस्ति यत्र त्रिषु खण्डेषु द्वानवतिशीर्षकेषु या सामग्री संकलिता तत्र कालिदासमवलम्ब्य लेखत्रयं प्रकाशितम्। कुलपतिश्रीधरवासुदेवसोहोनी-महोदयेन 'Dusyanta's attempted Bluff'[३५] इत्यस्मिन्नालेखे अभिज्ञानशाकुन्तले शकुन्तलायास्सख्योः पुरतः दुष्यन्तस्य व्याहारं व्यवहारंचावलम्ब्य विचारः कृतः। डॉ. सत्यपालनारंगमहाभागेन 'Kalidasa's Parallals'[३६] इत्यस्मिन्निबन्धे कालिदासस्य पूर्वसूरीणां, समकालीनानां परवर्तिनाञ्च कवीनां शोधपूर्णा चर्चा विहिता। डॉ. गौतमपटेलमहाभागेन 'Gita and Kalidasa'[३७] इत्यत्र गीतायाः कालिदासोपरि प्रभावो विमृष्टः। अस्मिन्नेवाभिनन्दनग्रन्थे डॉ. सुषमाकुलश्रेष्ठ-महाभागया 'Music in the Buddhacarita of Asvaghosa'[३८] इतिशीर्षके शोधपत्रे अश्वघोषस्य बुद्धचरितमहाकाव्ये संगीततत्त्वमन्विष्टम्। प्रो आर.एन. सम्पतमहाभागेन 'Subhasitanivi of Vedantadesika: An Appraisal'[३९] इत्यस्मिंलेखे वेदान्तेदेशिकस्य सुभाषितनीवीमवलम्ब्य विचारितम्। 'अभिराज' डॉ. राजेन्द्रमिश्रमहाभागेन 'Modern Sanskrit Poetry'[४०] इत्येतच्छीर्षके शोधपत्रे आधुनिकसंस्कृतकवितायाः भावतत्त्वं स्वरूपरचनां चावलम्ब्य महत्त्वपूर्णा विचाराः प्रदत्ताः।

अस्मिन्नेव ग्रन्थे डॉ. जयमन्तमिश्रस्य 'काव्यश्रवणात्परं रसनिष्पत्तिपर्यन्तं समपेक्षितकालस्य विमर्शः'[४१], डॉ. वी.एम. कुलकर्णीमहाभागस्य च

'Professor Kangle's emendation of Abhinavabharati Chepter XVIII'[४२] इत्येतच्छीर्षकौ लेखौ काव्यशास्त्रीयसमीक्षापरौ स्तः। प्रो. सत्यव्रतशास्त्रिभिः ग्रन्थस्यादौ 'Foreword' रूपेण ग्रन्थमवलम्ब्य स्वविचाराः प्रदत्ताः सन्ति, डॉ. रामकरणशर्मणा च 'प्ररोचना' लिखिता।

डॉ. सत्यव्रतशास्त्रिमहाभागानामभिनन्दनग्रन्थः 'सत्यसुधा'[४३] शीर्षकेण प्रकाशितः। अस्मिन् शास्त्रिमहाभागानां व्यक्तित्वं कर्तृत्वं चावलम्ब्य सप्रमाणं विस्तृता चर्चा कृतास्ति। ग्रन्थकारः डॉ. सत्यव्रतवर्मा आंग्लभाषामाध्यमेन डॉ.. सत्यव्रतशास्त्रिकृतान् 'बोधिसत्त्वचरित्'—'श्रीगुरुगोविन्दसिंहचरित'— 'थाइदेशविलास' - 'श्रीरामकीर्तिमहाकाव्य' - प्रभृतीन् ग्रन्थान्, स्फुटकविताः पत्रकाव्यानि च परिशीलयन् संस्कृतस्य नवरचनाभिः पाठकान् परिचाययति। अयं ग्रन्थः 'डी० लिट्०', शोधोपाधिं लब्धवान्।

कुलपतिश्रीधरवासुदेवसोहोनीमहाभागानाभभिनन्दनग्रन्थः 'कालिदास श्रीधरी'[४४] 'Erotics in Kalidasa' इत्येतद्ग्रन्थमालायाः प्रथमपुष्पत्वेन प्रकाशितोऽस्ति यत्र नायक-नायिका-गुणालंकार-विवेचनपरका सामग्री प्राधान्येन संकलिता। कालिदासकृतिषु कामकलामन्विष्यमाणैर्लेखकैर्नायिकानामष्टौ सात्त्विकगुणान्, नायिकानां त्रयस्त्रिंशदलंकारान्, नायकानां सप्तदश अलंकराँश्चावलम्ब्य विचारः कृतः।

भवतां पुरतोऽभिभाषमाणममुं जनं (रमाकान्तशुक्लम्) अनुग्रहीतुम् डॉ. राजेन्द्रमिश्रमहाभागस्य प्रधानसम्पादकत्वे 'देववाणी-सुवासः'[४५] इत्येतच्छीर्षकोऽभिनन्दनग्रन्थः प्रकाशितोऽस्ति। पंचप्रसरात्मकस्यास्य ग्रन्थस्य खण्डद्वये प्रकाशनं जातम् यत्र संस्कृतसाहित्यस्य विविधान् पक्षानवलम्ब्य जनममुं चावलम्ब्य हिन्दी-संस्कृतांग्लभाषामाध्यमेन एकत्रिंशदुत्तरद्विशत संख्याकैर्विद्वद्भिर्गद्यपद्यात्मिका सामग्री प्रदत्ता। तृतीये प्रसरे सर्वश्री-आचार्यरामकिशोरशर्म-प्रभुदयालुअग्निहोत्री - उमारमणझा- कामताप्रसादत्रिपाठि-बाबूरामअवस्थि - शम्भुनाथआचार्य - कविपुण्डरीक सम्पूर्णदत्तमिश्र- वासुदेवकृष्णचतुर्वेद-प्रभाकरनारायणकवठेकर-रामकरणशर्म- जयदेवजानी 'रसराज'-टी.वी. परमेश्वर अय्यर - दीपकघोष - लीनारस्तोगी 'कविरत्न' ओम्प्रकाशठाकुर-जनार्दनप्रसादपाण्डेय 'मणि'-श्री. सुन्दरराज-

बदरीनाथकल्ला-राधावल्लभ-सौ. कमल अभ्यंकर-हर्षदेवमाधव-देवदत्तभट्टि-प्रेमनारायणद्विवेद - श्रीधरभास्करवर्णेकराणामस्य च जनस्य काश्चित् कविताः संकलिताः। चतुर्थे प्रसरे डॉ. सावित्रीशर्ममहाभागायाः 'देवभाषा संस्कृतम्', डॉ. मुहम्मद इसराइल खान-महाभागस्य 'The Impact of Puranas on Hinduism',[४८] डॉ. गंगाधरपंडा-महाभागस्य 'साहित्यस्य शास्त्रत्वविचारः',[४९] आचार्यपण्डितआद्याचरणझा-महाभागस्य 'साहित्ये सत्यम् शिवं सुन्दरम्: एकमनुशीलनम्',[५०] पण्डितचन्द्रदीपशुक्लस्य 'संस्कृत साहित्य में राष्ट्रीय चेतना',[५१] प्रो० ई० पी० भरत पिषारटि-महाभागस्य 'कालिदासस्य कलावैशिष्ट्यम्',[५२] डॉ. गिरधारीलालचतुर्वेदस्य 'Kalidasa as an Art Critic',[५३] डॉ. प्रकाशपाण्डेमहाभागस्य 'Sa Vartate Samprati',[५४] डॉ. एन.पी. उन्निमहाभागस्य 'Nagananda: A General Introduction',[५५] डॉ. करुणेशशुक्लस्य 'Mordern Indian Attitude towards Sanskrit Literary Tradition',[५६] डॉ. खगेन्द्र पात्रस्य 'महामहोपाध्याय-गोविन्दमिश्रविरचितं गौरकृष्णोदय-महाकाव्यम्',[५७] आचार्यश्रीनिवासरथस्य 'अतिद्वयी कथा'[५८] प्रो. श्रीधरवासुदेव-सोहोनी-महाभागस्य 'Sthavaraka Ceta'[५९] डॉ. लक्ष्मी शुक्लायाः 'कालिदास का तत्त्व चिन्तन'[६०] इत्यादयो लेखाः साहित्यिकसंस्कृतं साहित्यशास्त्रं च सम्यक् स्पृशन्तो नूनमेव शोधकर्तॄन् आवर्जयितुम् क्षमाः।

'देववाणी-सुवास'स्य पञ्चमप्रसरात्मको द्वितीयः खण्डः विंशशताब्दीयस्य संस्कृतसाहित्यस्य विस्तृतं परिचयं ददाति। त्रिनवतिलेखेषु विंशशताब्द्यां प्रकाशितानां संस्कृतमहाकाव्यानां[६१] शतककाव्यानां[६२] दूतकाव्यानां[६३] समस्यापूर्तिकाव्यानां[६४] स्तोत्रकाव्यानां,[६५] चित्रकाव्यानां',[६६] कथाकाव्यानां',[६७] नाटकानां',[६८] पत्रपत्रिकाणां[६९] मुक्तकानां[७०] हास्यव्यङ्ग्यकाव्यानां,[७१] काव्यशास्त्रीयग्रन्थानां,[७२] प्रशस्तिकाव्यानामन्येषांच[७३] काव्यरूपाणां[७४] विषये इदम्प्रथमतया प्रभूता सामग्री एकत्र प्रस्तुता। अनेकेषां काव्यानां काव्यप्रवृत्तीनां च समीक्षापि कृता विद्वद्भिः[७५]। अनेकैः रचनाकारैः स्वकाव्ययात्रामवलम्ब्य लिखितम्। विविधेषु प्रदेशेषु विदशेषु च स्थितैर्विद्वद्भिः रचनाकारैश्च संस्कृतं प्रति यद्योगदानं कृतं तस्यापि चर्चात्र कृतास्ति[७६]। अद्यतनसंस्कृतकवीनां विषये यान्याभाणकानि प्रसिद्धानि तेषामपि चर्चा कृतास्ति। देववाणी-परिषदादिसंस्थाभिः

प्रकाशितस्य संस्कृत-साहित्यस्य परिज्ञानमपि कारयति 'देववाणी-सुवासः'[७८]। कस्यचिज्जनस्य अभिनन्दनं तु वस्तुतो व्याजमेव भवति सारस्वत-चर्चां विधातुम्। एतादृशैः प्रयत्नैः साहित्यमवलम्ब्य या चर्चा भवति तस्या एव प्राधान्यं भवति।

डॉ० रामकरणशर्मणां[७९] डॉ० एस०जी० काण्टावालामहाभागानां[८०] डॉ०. अशोकचटर्जी-शास्त्रिणामाचार्यश्री निवासरथमहाभागानां[८१] चाप्यभिनन्दनग्रन्थाः प्रकाशनाधीना विद्यन्ते यत्र महाभारतं, पुराणसाहित्यमन्यांश्च विषयानधिकृत्य सामग्री संकलिता स्यात्।

स्मृतिग्रन्थेष्वपि संस्कृतसाहित्यमवलम्ब्य प्रसक्त्यानुप्रसक्त्या चर्चा संजाता। 'डॉ० मल्लेदेवरु-स्मृतिग्रन्थे' डॉ० अशोकचटर्जीशास्त्रिणां 'Neo Poesy in Sanskrit'[८२] इति शीर्षको लेखः प्रकाशितोऽस्ति यत्र संस्कृत-काव्ये आधुनिकतामवलम्ब्य केचित्प्रश्नाः समुत्थापिताः सन्ति। आशासे, अस्यां दिशि विदुषामन्येऽपि विचाराः समागमिष्यन्ति।

रचनात्मकसाहित्यम् : नाटकानि

नाटकानां दृशायमालोच्यकालः नैजां समृद्धिं सूचयति। डॉ० रामकिशोरमिश्रस्य 'देवयानी'[८३] नाटिका, श्रीवासुदेवआचार्यस्य 'मधुलिप्सा'[८४] श्री० भि० वेलणकरस्य 'मेघदूतान्वितम् (गीतनृत्यनाट्यम्)'[८५] 'अभिराज' डॉ०राजेन्द्रमिश्रस्य 'दिल्लीपरिदेवनम्'[८६] एतत्पंक्तिलेखकस्य 'नाट्यसप्तकम्'[८७] इत्येतादिका नाट्यकृतयः प्रकाशं गताः। डॉ० इच्छारामद्विवेदप्रणवस्य 'सत्प्रेरणा'[८८] नाटकं प्रकाशनाधीनं विद्यते। एतासु रचनास्वधिकांशानां प्रयोगा अपि संजाताः। इमा नाट्यकृतयः पुरातनकथानकानि गृह्णन्तयोऽपि स्वयुगं नैवोपेक्षन्ते । अवश्यं ता वर्तमानयुगायापि कान्तासम्मिततयोपदेशं दातुं प्रयतन्ते।

डॉ० गौरीनाथमिश्र 'भास्करस्य' 'गुरुदक्षिणानाटकम्'[८९] सप्तांकेषु कौत्स-वरतन्तु-प्रसंगमुपस्थापयति। श्रीरामकृष्णशर्मणः 'नाट्यत्रयी'[९०] त्रयाणां नाटकानां संकलनमस्ति यत्र शाकुन्तलकथा-कर्णवृत्तान्तादेर्नवीनदृशा प्रस्तुतिर्जाता।

डॉ० वनेश्वरपाठकप्रणीता 'चाण्डालिका'[९१] विश्वकवि रवीन्द्रनाथ ठाकुरकृत-चाण्डालिकायाः संस्कृनाट्यरूपान्तरं विद्यते। यस्य प्रथमं संस्करणं

1981 तमेशवीयेऽब्दे प्रकाशितमासीत्। इदानीं द्वितीयं संस्करणं प्रकाशितम्। डा०पाठकस्यैव 'विक्रान्तकर्णम्'[१२] कर्णस्य चरितमालम्ब्य कृतं नाटकमस्ति यस्य सन्देशोऽस्ति-*'जातिर्नैव हि पूज्यते सुमतिभिर्व्यक्तिः सदा पूज्यते।'*

महाकाव्यानि

नैककाव्यर्तृभिः डॉ०सत्यव्रतशास्त्रिभिः 1989 एकोनाशीत्युत्तरैकोनविशंतितमेशवीयेऽब्दे गुरुपूर्णिमायां, थाइलैण्डे प्रसिद्धस्य श्रीरामकीर्तिकथानकस्येदम्प्रथमतया प्रणीतं संस्कृतरूपान्तरणं सम्पूर्णतामानीतम्। तदेव 'श्रीरामकीर्तिमहाकाव्यम्'[१३] इति नाम्ना 1990 तमेशवीयेऽब्दे बैंकाकतः प्रकाशितं जातम्। थाइरामकथामश्रित्य प्रणीतमिदं संस्कृतमहाकाव्यं सदुक्तीनां निधानं वर्तते। स्थाने स्थाने पूर्वकवीनां वाक्यांशाः कविवाचि पदं निदधते। इत्थं च वाल्मीकि-कालिदासादीनां वचांसि पुनरुद्धृतानि काव्ये कामपि नूतनामेव विच्छित्तिं सन्दर्भगर्भकतां च पुष्णन्ति। दिङ्मात्रामुदाह्रियते असुरफद्वाक्यं चिरात्प्रत्यभिज्ञातं स्वपितरं हनूमन्तं प्रति-

'अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः।
चिराय यद्दर्शनमीप्सितं मे स एव साक्षात्पुरतो ममास्ति।।
ममेष्टदेवोऽसि पिता मम त्वं मनोरथानामतटप्रपातः।
त्वद्दर्शनेनैव कृती तथापि गुर्वत्र कार्यं प्रतिपादयामि।।[१४]

इदं महाकाव्यमवलम्ब्य 'सत्यसुधा'शीर्षके ग्रन्थे डा० सत्यव्रतवर्मणा विस्तरशश्चर्चा विहितास्ति। जिज्ञासुभिरेष ग्रन्थोऽवलोकनीयः। मदीयं सौभाग्यमिदं यन्मया साक्षात्कविमुखादस्य महाकाव्यस्याधिकांशः श्रुतः।

डॉ० गोस्वामिबलभद्रप्रसादशास्त्रिणः सद्यः प्रकाशितं चतुर्दशसर्गात्मकं 'दूतांजनेयम्'[१५] नाम महाकाव्यं श्रीहनूमतो दौत्यकर्माधारीकृत्य विरचितमस्ति। विविधवर्णनानि, सूक्तिविधानम्, वीराद्भुतरसयोजना, छन्दोविधानम्-इत्येतंसर्वमेव अत्र महाकाव्ये दृश्यम्। महाकाव्यमिदमवलम्ब्य डॉ० कृष्णकान्तशुक्लेन विस्तृता भूमिका लिखितास्ति या अध्येतॄणां कृते नूनमुपकारिणी वरीवर्ति।

डॉ. हरिनारायणदीक्षितप्रणीतं 'भीष्मचरितं'[१६] नाम महाकाव्यं विशंतिसर्गेषु पारम्परिकवृत्तैर्निबद्धमस्ति। अस्मिन् महाकाव्ये भीष्मस्य जीवनचरितं कविना

निबद्धम्। सुविदितमेव विदुषां यदनेन महाकविना इतः पूर्वं नैका रचनाः प्रणीताः किंचास्य 'संस्कृत साहित्य में राष्ट्रिय भावना' इत्याख्यः डी० लिट्० शोधप्रबन्धः राष्ट्रप्रेमाणमस्य व्यनक्ति। भीष्मचरितस्य प्रथमसर्गत एवास्य राष्ट्रभक्तिर्व्यक्तीभवति-

सुरासुराणामपि वन्द्यतां गतं मखाग्निधूमेन सदा सुगन्धितम्।
रतं च पुण्येषु मनुष्यतावृतं विशालराष्ट्रं मम भाति भारतम्।।

अतः परं कथावतारं कुर्वन् कविः हस्तिनापुरनृपतेः शान्तनोः राज्य-व्यवस्थां वर्णयति। मन्ये, एतद्वर्णनेन सोऽद्यापि तादृशीमेव व्यवस्थां वांछति। कीदृशीयं व्यवस्था, दृश्यताम्-

न कोऽपि दुःखी न च कोऽपि पीडितो न निर्धनो नैव च जीविकां विना।
न कश्चिदातंकित एव मानवो नयेन शौर्येण च तस्य शासने।।
अशिक्षितो नापि च कोऽपि भिक्षुको न कोऽपि चौरो न च कोऽपि वंचकः।
न वा निराशो न हि कोऽपि लुण्टको बभूव देशे सति शान्तनौ नृपे।।
अकारि नोत्कोचकथापि केनचित् स्वकार्यकार्ये नृपकर्मचारिणा।
न मन्त्रणा पीडयितुं च सज्जनं न देयपूर्तौ गुणिवंचना क्वचित्।।
न जातिवादो न च वर्गभावना च वोच्चनीचादिविभेदवेदना।
बभूव नातंकिजस्य वन्दना महीयसी शान्तनुनीतिदेशना।।
निजे निजे कर्मणि सर्वमानवाः तदा प्रवृत्ता अभवन्मुदान्विताः।
समस्तदेशे धनधान्यसम्पदो निरन्तरं चात्र विकासमाययुः।।[९९]

कविना अलंकृतशैल्यामपि सर्वत्र प्रसादगुणस्य निर्वाहः कृतः। किंच महाभारतस्य विश्रुतचरित्रस्य भीष्मस्य वर्णनव्याजेन स्वयुगस्य समस्यानां समाधानार्थमपि दिशो दर्शिताः। महाकाव्यमिदं साहित्य-अकादम्या पुरस्कृतम्।

मया द्वादशवर्षाणि पूर्वम् 'अर्वाचीनसंस्कृत'स्य तृतीयवर्षीये चतुर्थेऽङ्के 'निर्माणाधीनं महाकाव्यं श्रीनेहरूचरितम्'[१००] इतिशीर्षकलेखमाध्यमेन कविरत्नश्रीअमीरचन्द्रशास्त्रिभिः द्वासप्ततिसर्गेषु चिकीर्षितस्य यस्य महाकाव्यस्य विषये संक्षिप्ता सूचना प्रदत्तासीतस्य[१०१] नवत्युत्तरैकोनविंशतितमेशवीयेऽब्दे

(1990) 'श्रीनेहरूचरितमहाकाव्य' शीर्षकेण प्रकाशनं संवृत्तम्। इदं हिं महाकाव्यं पण्डितजवाहरलालनेहरोः 'मेरी कहानी' ति आत्मकथायाः संस्कृतकाव्यानुवादः। अस्मिन् महाकाव्ये 'कविशिरोमणिना' श्रीअमीरचन्द्र शास्त्रिणा द्वात्रिंशच्छन्दसां प्रयोगः कृतः। श्रीनेहरोरात्मकथायाः संस्कृतगद्यानुवाद इतः पूर्वं स्व० कमलापतिमिश्रेण 'मदीयात्मकथे' तिशीर्षकेण कृत आसीत्। इदानीं श्रीनेहरूचरित-महाकाव्यस्य प्रकाशनेन तस्याः पद्यानुवादोऽपि सुलभो जातः।

डॉ० इन्द्रदेवद्विवेदिनः 'सुदामचरितम्'[१०२] नाम महाकाव्यम् एकविंशतिसर्गेषु सुदाम्नश्चरितं वर्णयति।

श्रीकृष्णदत्तशर्मणा 'शिववीरचरितं'[१०३] नाम विंशतिसर्गात्मकं महाकाव्यं सद्य एव प्रकाशितम्। 'मान्या मही' तिनाम्नि प्रथमसर्गे कविर्देशे देशभक्तान् सुवीरान् कांक्षति-

सुरवरमुनिवन्द्या भारतीया धरित्री
जलधिजलतरंगैर्धौतपादा पवित्रा।
विविधफलसुधान्यैः सुप्रदेशैः प्रपूर्णा
जनयतु जननी सा देशभक्तान् सुवीरान्। (१/१) पृ० ५

'सनातन' काश्यपरेवाप्रसादद्विवेदप्रणीतं 'स्वराज्यसम्भवम्'[१०४] नाम महाकाव्यं भारतस्य स्वातन्त्र्यावाप्तिं किंच तदुत्तरं देशस्य व्यवस्थां चित्रयति। अस्मिन् महाकाव्ये वर्तमानकेन्द्रीयशासनपर्यन्तं घटनाः काव्यात्मकदृशा महाकविना उपनिबद्धाः सन्ति।

अस्मिन्नेव पुण्यपत्तने 26.2.1992 तारिकायां स्वातन्त्र्यवीरसावरकर पुण्यतिथौ कविकेदार-गंगाधरविष्णुठेकेदारकृता 'स्वातन्त्र्यवीरगाथा'[१०५] प्रकाशिता जाता यत्र द्वादशपर्वसु स्वातन्त्र्यवीरविनायकदामोदरसावरकरस्यय जीवनगाथा निबद्धा।

कविकेदार-गंगाधरविष्णुठेकेदाराभ्यां प्रणीतं 'महात्मायनम्'[१०६] महात्म-गान्धिनो जीवनगाथां चतुर्दशाध्यायेषु 1968 श्लोकेषु प्रस्तौति।

खण्डकाव्यानि, शतककाव्यानि, दूतकाव्यानि

वेलूरिसुब्बारावुशर्मणः 'सुन्दरीमेघसन्देशः'[107] षट्सर्गात्मकं खण्डकाव्यमस्ति। रामचन्द्रमिश्रस्य 'तरुकथा'[108] वृक्षानधिकृत्य कृतं काव्यं वर्तते। रामचन्द्र (हरिशरण) शाण्डिल्यस्य 'कामदूतम्'[109] मर्मस्पर्शि खण्डकाव्यमस्ति यदविभाजित-भारतस्य रामणीयकं सिन्धुप्रदेशसम्बन्धीनि कवेः संस्मरणानि च प्रस्तौति। जानकीनाम्नी नायिका स्व दयितं रामचन्द्रमन्वेष्टुं तस्मै सन्देशं च दातुं कामं चरत्वेन दूतत्वेन च वृणोति। विभाजनकालीनविभीषिकाया अस्मिन् काव्ये हृदयस्पर्शि वर्णनं कृतं कविना। डॉ० जगन्नाथपाठकस्य 'विच्छित्तिवातायनी'[110] विच्छित्तिवातायनी, श्रीकृष्णभावनाशतकम्, रामत्वशतकम्, कविताशतकम्, स्त्रीशतकम्, सौन्दर्यकारिका चेति षट्शतकानां संकलनं विद्यते। कवेः प्रियं छन्द आर्याऽत्रापि प्रधान्यं भजते । अस्य काव्यस्य प्रत्येकं पद्यं मुक्तकमस्ति यत्र सुभाषितच्छटा सुतरां विलोकयितुं शक्यते। स्त्रीशतके स्त्रीपुरुषयोरन्योन्यापेक्षितां वर्णयन् कविर्भणति-

पुरुषः स्त्रिया विभाति स्त्री च विभातीह किमपि पुरुषेण।
उभयोरपि सामान्यो भूषणभूष्याख्यसम्बन्धः।।[111]

कविताशतके कविः काव्यचिन्तनं करोति। इतः पूर्वं कवितामवलम्ब्य डॉ० रेवाप्रसादद्विवेद-'अभिराज'राजेन्द्रमिश्र-उमाकान्तशुक्लादिभिरपि कवितामाध्यमेन चिन्तनं कृतम्। जगन्नाथपाठकस्य काव्यचिन्तनमस्यां परम्परायां नूतनोपलब्धिरस्ति। स्थालीपुलाकन्यायेन कवेश्चिन्तनं प्रस्तूयते-

निर्माणार्थमनेकेष्वप्यद्यत्वेऽपि प्रवर्तमानेषु ।
रमणीयार्थविलसिता कस्याप्युत्पद्यते कविता।।
स्फटिक इवातिस्वच्छे सुविशाले शुचितमे भृशं स्निग्धे।
दर्पण इव कविहृदये कविता झटिति स्फुटीभवति।।
उल्लासयति न चेतः कर्णाभ्यन्तर्गतैव या झटिति।
या काचिदपि भवेत्सा कविता नास्त्येव नास्त्येव।
भाषन्ते बहुबहवः सुविशाले जगति ते कविम्मन्याः।
विलसति परमिह वदने कविता धन्यस्य कस्यापि।।

क्षीरोदचन्द्रदाशस्य 'तारुण्यशतकम्'[११२] (उडियाभाषानुवादसहितं) तारुण्यसम्बन्धिनो विषयानवलम्ब्य रचितानां शृंगाररसप्रधानानां संकलनमस्ति। 'यौवनदेवता'मधिकृत्य कविर्भणति-

बालानां नवजीवनोत्सुकयुतामुन्मादिनी चन्द्रिका
कान्ता कोमलकान्तिकौतुककला-मञ्जूषिकोद्घाटिका।
योषाजीवनदीपिका कुलवधूसम्भोगसम्वर्धिका
जीयाद् यौवनदेवता तनुभृतामानन्दसम्वाहिका।।[११३]

काव्यान्ते कविर्मधुरकामनामित्थं करोति-

गुञ्जन् गुञ्जन् कुसुमरसिको मञ्जरीं यातु यातु
कर्णे कर्णे मधुर मुरली माधुरीं सन्तनोतु ।
मन्दं मन्दं मलयपवनो यौवने वातु वातु
स्पर्शं स्पर्शं सकलहृदयं-गीतरागं करोतु।।[११४]

'व्योमशेखर' विशनलालगौडस्य 'अहं राष्ट्री'[११५] भारतराष्ट्रस्य सांस्कृतिकं गौरवं गायति। अत्र वक्त्री अस्ति राष्ट्री या भारतमातेवास्ति। तस्या अभिलषितमिदमस्ति-

त्रिवर्णा चक्रांका प्रकृतिपुरुषा सर्गरचना
पताकाहं राष्ट्री जलधितलमूला हिमलता
ऋचा शान्तेश्चाहं व्यपगतभयं विश्वमखिलं
मम च्छायानीडे वसतु ससुखं मेऽभिलषितम्।।[११६]

काव्यास्यस्य समापनं राष्ट्र्या अनेन वाक्येन भवति- *'चिरविजयि राष्ट्रं विजयताम्'*। काव्ये आद्यन्तं शिखरिणीवृत्तं प्रयुक्तमस्ति।

विद्यासागरस्य श्रमणशतक-निरञ्जनशतक- भावनाशतक-परीषहशतक-सुनीतिशतकानां संकलनं 'पंचशती'[११७] इत्येतन्नाम्ना सञ्जातम्। अस्य संस्कृतटीकाकारः सम्पादकश्च पं० पन्नालाल जैनः साहित्याचार्योऽस्ति।

डॉ० रमाशीषपाण्डेयस्य 'प्रहेलिकाशतकम्'[११८] संस्कृतप्रहेलिकाः

प्रस्तौति। 'सुधेन्दु' डॉ० अमियचन्द्रशास्त्रिण: 'श्रीमद्भगवत्परशुराम - विजयशतकम्'[११९] (हिन्दीभाषानुवादसहितम्) श्रीपरशुरामस्य विजयं कीर्तयति।

'अभिराज' राजेन्द्रमिश्रस्य शतकानां संकलनपि 'पंचकुल्या'[१२०] शीर्षकेण सद्यः प्रकाशितमस्ति। कविरत्नश्रीकृष्णसेमवालस्ये 'भीमशतकम्'[१२१] डा० भीमराव अम्बेडकरस्य जीवनं सन्देशं च वर्णयति।

'मित्रदूतं' नाम खण्डकाव्यं दूतकाव्यपरम्परायामभिनवं संयोजनमस्ति। मैनपुरीनिवासिना 'प्रणवो'पाख्येन डॉ० इच्छारामद्विवेदेनास्या रचनाया व्याजेन इन्द्रप्रस्थात् बदरीनारायणधाम यावत् यद्यद्रामणीयकं दृष्टं तस्य व्यञ्जना कृता। युवायं कविर्मदीयो घनिष्ठः सुहृत्। एकवारमनेन कैश्चित्स्निग्धजनैस्साकं बदरीनाथ-यात्रा कृता। तदनु श्रीबदरीनाथाय स्वप्रणतिसन्देशं दापयितुकामोऽयं मामेव (रमाकान्तं) मित्रं दूतत्वेन वृणोति-

काश्चिद्विप्रो मयननगरे ग्रीष्मबाधानुतप्तः
प्रत्यावृत्तः सपदि विमलाद्धेमकूटात्पवित्रात्।
स्मृत्वा स्मृत्वा परमसुखदञ्चोत्तराखण्डशैत्यं
भावाकाशे स्फुरितशिखरः पत्रमेतल्लिलेख॥
इन्द्रप्रस्थे विशदविभवे शुभ्रवाणीविहारे
कान्तायुक्तं सरसहृदयं श्रीरमाकान्तशुक्लम्।
प्रेयोमित्रं मधुरमधुरैर्भावगुच्छैरुपेतं
पत्रं दत्वा शुभहिमगिरौ प्रैषयन्मित्रदूतम्॥[१२३]

एतदनन्तरं कविः प्रस्थानमार्गं निर्दिशति। मयराष्ट्र (मेरठ)-हरिद्वार- मसूरी-नौगाँव - बड़कोट - हनुमानचट्टी - नारदचट्टी - जानकीचट्टी - यमुनोत्तरी धाम- ब्रह्मखाल- धरासूँ - उत्तरकाशी - टिहरी - श्रीनगर - रुद्रप्रयाग - तिलवाड़ा-अगस्त्यकुण्ड - गुप्तकाशी - सोनप्रयाग - गौरीकुण्ड - रामवाड़ा - केदारनाथ-आदिशंकरसमाधि - गौरीकुण्ड - चमोली - पीपलकोटि - जोशीमठ - विष्णुप्रयागानतिक्रम्य बदरीनारायणधाम यावन्मार्गं निर्दिश्य कविः श्रीबदरीनारायणाय स्व प्रणतिसन्देशं निवेदयितुं स्वमित्रं प्रार्थयते। लोकवृत्तं काव्यरूपे परिणतं सत्कीदृशं लोकोत्तरं सञ्जायते - इत्यस्य निदर्शनमस्तीदं

खण्डकाव्यम्। देवतात्मनो हिमालयस्य शृंगाणि दृष्ट्वा मानवो मोदं लभते इति प्रतिपादयन् कविः सम्बोध्यं ब्रूते-

अत्रस्थस्त्वं शुभहिमगिरेः शुभ्रशृंगाणि नूनं
दृष्ट्वा दृष्ट्वा चकितनयनैर्मोदभावे निमग्नः।
गायन्नुच्चैः सरसकवितां भाति मे भारताख्यां
दिव्यं हर्षं कविकुलमणे लप्स्यसे गायनस्य।।[१२४]

सरससरलं खण्डकाव्यमिदं भारतस्य साम्प्रतिकीं प्राकृतिकीं सांस्कृतिकीं च शोभामुपन्यस्यति सचेतसां पुरतः।

श्री वसन्तत्र्यम्बकशेवडेप्रणीतम् 'अभिनवमेघदूतम्'[१२५] कालिदासमेघदूतेऽचर्चितानां स्थानानां वर्णनमुपन्यस्यति।

आचार्यवनेश्वरपाठकस्य 'तवास्मि दासः'[१२६] इत्येतत्खण्डकाव्यं कुमारसम्भवं शिवपुराणं चाधारीकृत्य विरचितं वर्तते। अस्य पूर्वस्मिन् भागे शिवं वरत्वेन प्राप्तुं पार्वत्या कृता तपस्या वर्णितास्ति, उत्तरस्मिंश्च भागे शिवपार्वतीविवाहो वर्णितोऽस्ति। कविना विवाहमंगलविधिसम्बन्धिन्यो लोकरीतयोऽपि यथावसरं प्रदर्शिताः। सरलसरसा भाषा पाठकानां चेतोहरणाय अलमस्ति। दिङ्मात्रमुदाह्रियते-

विधौ चतुर्थ्यां विहिते विधानतो लग्ने च वाचस्पतिना सुनिश्चिते।
हिमालयः स्वां तनुजां शिवान्वितां शिवालयं प्रेषितवान् समादरात्।।
प्रस्थानकाले दुहितुर्वियोगात्सवाष्पकण्ठस्खलितैर्वचोभिः।
मेना गिरीन्द्रश्च पुरः शिवस्य बद्धाञ्जली व्याहरतां विनीतौ।।
प्रभो त्वदर्थं किमपि प्रदेयमप्राप्य जामातृवराय तुभ्यम्।
चेतोऽस्मदीयं नितरां सखेदं क्षमस्व शम्भो त्रुटिमस्मदीयाम्।।
कृपा त्वदीया सुखदा मयीयं सम्बन्धरूपा समभूत् तथैव।
दृश्या मदीया तनुजा त्वयेयं गच्छ प्रभो! वां शुभमस्तु सर्वम्।।
प्रणम्य मेनागिरिराजपादौ सम्प्राह शम्भुर्विनयानतौ तौ।
दत्तं युवाभ्यां यदमूल्यवस्तु केनापि नो तादृशमस्ति दत्तम्।।

डा० भास्कराचार्यत्रिपाठिनो 'मृत्कूटम्' (मानवशतकम्)[१२८] स्रग्धराणां शतेनान्वितं प्रबन्धरसान्वितं खण्डकाव्यप्रभामण्डितं शतककाव्यमस्ति। अत्र कवेश्चिन्तनं काव्यरूपे परिणतम् । मृदः समुत्पन्नो मानवः आजन्मनो मृत्युपर्यन्तं विविधचेष्टाः कुर्वाणोऽन्ते मृद्येव लीनो भवति। तस्यैव मानवस्येयं गाथा-

मृत्स्नायाः संप्रजातः सुचिरमवकलन्मृत्तिकाभिर्विनोदं
मृत्सार्थं सस्पृहोऽभूदुचितमनुचितं सर्वमर्थं व्यतार्षीत्,।
सम्प्रत्येवञ्च लोष्टैरपिहितविवरे चत्वरेऽसौ मृदायाः
शेते विश्रान्तबोधो निपतति नियतं मृत्तिकायां मृदंशः।।[१२९]

काव्यस्यास्य विभाजनं भ्रूणः, शिशुः, किशोरः, तरुणः, गृहस्थः, प्रवासी, भृतकः प्रौढः, जरठः मुमूर्षुः, इत्येतेषु दशभागेषु कृतमस्ति कविना। कस्मिन्नपि वयसि वर्तमानो मानवः स्वच्छायामस्मिन् काव्ये द्रष्टुं शक्नोति। तरुणानां स्थितिं वर्णयन् कविः कथयति

साक्षादग्रेऽवतीर्णो यदि नवयुवकं राजराजोऽनुयुङ्क्ते
किन्ते प्रेयो नितान्तं वद भयरहितो यौवनं वा धनं वा,
तत्तूर्णं सोऽभिदध्यात् प्रथमचयनिका रोचते देव मह्यं
यत्ते वस्तु द्वितीयं तदु निजवसतौ किन्नरेभ्यः प्रदेयाः।।[१३०]
पाठी पाठीनवृत्त्या परिवहसलिलेऽप्येष याति प्रतीपं
वाजीवाजीवहेतोः श्वसितपरिमितं धावति स्तब्धकर्णः।
भोगी भोगीव चारात् तरलयति फणां तुम्बिकागीतलुब्धः
स्वापी स्वापीतिशंकामजगरसदृशो नैव वित्ते वयस्थः।।[१३१]

वार्धकस्य चित्रणं कियद् हृदयस्पर्शीति विलोक्यताम्ः

मृत्कूटो वार्धकेऽयं विविदिषतितरामंकुराणां विलासं
लास्यं जातीदलानां स्मृतिमवतरति स्थाणुशाखोटकस्य।

किन्तु क्रव्यानुरूपां पृथुतरकरकामंजसा सेवमानः
कीर्णत्रोटिः क्षणार्धे लवपरिलुलितो ध्वांक्षवद्राव्यथीति।।
योऽसौ शाखामृगोऽभूत् तनुपदयुगलीं चालयन् बाल्यकाले
शार्दूलोदग्रलीलां तरुणिमनि नवां शिश्रिये धीरचारः।
प्रौढः स्तम्बेरमाणां व्यधित गतिविधिं हन्त धिक्कारपात्रं
सोऽयं खट्वानिलीनो ज्वरदजगरतां वार्द्धके वावहीति।।[१३२]

नूनं मृत्कूटस्यैकैकं पद्यं प्रबन्धशतायमानं विभाति। अस्य काव्यस्य कविनैव कृतो हिन्दीगद्यानुवादोऽपि काव्यश्रियालंकृतोऽस्ति। 'नवद्वार' मितिशीर्षकोपेता दण्डकात्मिका भूमिकापि अलंकृतकाव्यपद्धतिं पुष्णाति। अवतरणिकायाम् अवस्थिभिः डॉ० बच्चूलालैः काव्यस्यास्य समीक्षा कृता या पाठकानां कृते अत्यन्तमुपयोगिनी। अस्य काव्यस्य समीक्षणं व्याख्यानं च कर्तुं सहृदया विद्वांसः सादरमाहूयन्ते।

डॉ० परड्डीमल्लिकार्जुनप्रणीतं 'सटीकम् अक्कमहादेवीशतकं'[१३८] 'सटीकं गंगाधरचरितं'[१३४] च क्रमशः मल्लिकार्जुन- प्रभुवरभक्तिं शिवयोगीश्वर-गंगाधरचरितं च प्रस्तुवतः।

अद्यत्वे यादृशी राजनीतिर्देशे प्रचलति सा नास्ति कस्यापि दृष्टेरगोचरा। अस्माभिरेव स्वदृशा ते राजनेतारो दृष्टा ये चारित्र्यवन्त आसन्, यैश्च देशसेवार्थं सर्वस्वं त्यक्तम्, अस्माभिरेवैतादृशा अपि राजनेतारोऽद्यत्वे ऽवलोक्यन्ते ये देशहितापेक्षया स्वहितमेव कांक्षन्ति, ये जनान् प्रत्यहं योधयन्ति, ये पुरा दुर्भावनादीप्तिं कुर्वन्ति तदनु च सद्भावना-यात्रां कृत्वा आगामिनि निर्वाचने तैस्तैरुपायैर्विजयं लब्धुमेव सतृष्णास्तिष्ठन्ति, देशसेवाया व्रतं गृहीत्वा ये निर्वाचनागंणेऽवतरन्ति पुनश्च लब्धे मनोरथे यादृच्छिकमाचरन्ति, पादयोः प्रणिपत्य घ्रोणाघर्षणं कृत्वा मतं याचन्ते किन्तु मतदातुर्मतस्यादरं न कुर्वन्ति, शासनासन्दिकाराधनैकव्रतानामेतादृशां युगपुरुषाणां विषयेऽपि अभिधया, लक्षणया, व्यजनया वा संस्कृतरचनाकृद्भिर्भावा व्यक्ताः। डॉ० दीपकघोषस्य 'राजनीतिलीलाशताधिकं'[१३५] चलमानराजनीतिमवलम्ब्य विरचितं सोल्लुण्ठकाव्यं वर्तते। इदं काव्यं खण्डकाव्यस्य शतककाव्यस्य वा कोटौ स्थापनीयमस्ति।

इदं काव्यं प्रथमम् 'अर्वाचीनसंस्कृते' प्रसिद्धं ज्ञातं तदनु च पृथक्पुस्तकाकारेण प्रकाशितं वर्तते। कविना एकादशोत्तरैकशतपद्येषु राजनीतिं प्रति प्रणतिपुरस्सरं स्वभावा विचाराश्च निवेदिताः

भो राजनीते प्रणमामि तुभ्यं पुनः पुनस्ते पदयोः प्रणामः।
अनन्तकीर्तीरमिताश्च शक्तीः शक्नोमि मातुं न तव क्षमस्व॥
विचित्रवर्णा न विशेषवर्णा विचित्रमार्गा न विशेषमार्गा।
विचित्रचित्ता न हि दुष्टचित्ता भो राजनीते भवती विचित्रा ॥[३६]

क्वचित्कवी राजनीतिं मधुरैर्वचोभिरधिक्षिपति, क्वचित्तस्याः स्वार्थसाधनतत्परतां विवृणोति। तद्यथा-

न वेत्सि वृद्धं न शिशुं न नारीं नार्तं न दीनं न तु वेत्सि मित्रम्।
न वेत्सि किं स्वानपि तत्सकांस्ते स्वमेव वेत्सीह भृशं विचित्रे॥[३७]

अद्य सर्वलाभकरो व्यवसायो राजनीतिरिव प्रतीयते, तदैव तु कलाकाराः, शिल्पिनः, अभिनेतारः, प्राध्यापकाः, सैनिकाः, सर्वेऽपि स्वनियोगं शून्यं कृत्वा राजनीतिमेव सेवितुकामा अवलोक्यन्ते-

विस्मृत्य सम्प्रत्यभिनीतिशिल्पं समुज्ज्वलच्छिल्पिसुचित्रतारकाः।
अत्युच्चकैः कीर्तिदिवश्च्युतास्तव भो राजनीतेश्चरणं समाश्रिताः।
स्थानाय ते पादसरोजयोश्च विसर्ज्य तौर्यत्रिकशिल्पचर्चाम्।
अन्ये कलाशिल्पगुणाधिराजाः सर्वे हि धावन्तितरामलज्जम्॥
अध्यापनंचाध्ययनंच शश्वद् विवेचितं यैस्तप एकमेव॥
धावन्ति ते ज्ञानतपस्विनोऽपि निर्वाचने त्वत्पदरेणुलोभाः॥
दुर्लभ्यनिर्वाचनमाल्यलाभी धावत्यसौ मल्लयुयुत्सुवीरः।
शरीरचर्चां परिहाय पश्चादास्फोटयन् बाहुयुगं स्मयेन॥
प्राणव्ययेनापि च देशमातृकारक्षाव्रतं पूर्वकृतं विसर्ज्य।
सीमान्तभूमिं परिवर्ज्य सैनिकास्त्वां मातृकां पूजयितुं प्रवृत्ताः॥
क्रीडांगणं शून्यमदो विशारदै रणांगणं वीरभटास्त्यजन्ति।
मन्त्री गतः क्व सचिवः क्व वास्ते कार्याधिकारा मरुवद्विभान्ति॥

एवं तवाङ्घ्रिस्फुटपंकजामृतनिष्यन्दविन्दून् परिलेढुकामाः।
एकैकशो देशविशिष्टशिष्टा निर्वाचनप्रार्थितया समेताः।।[१३८]

डॉ० दीपकघोषस्य कवितेयं निरन्तरं परिवर्धमाना एव चकास्ति। एकनवत्युत्तरैकोनविशंविशततमेशवीयेऽब्दे जनवरीमासे 'अर्वाचीनसंस्कृते' अस्या १११ पद्यानि प्रकाशितानि जातानि। अतः परमपि मत्सकाशे प्रियबन्धोरस्य राजनीतिलीलापद्यानि नैकवारं प्राप्तानि, प्राप्यन्ते च। द्वानवत्युत्तरैकोनविशंतिशततमेशवीयेऽब्दे जनवरीमासेऽपि अर्वाचीनसंस्कृते कानिचित् पद्यानि मुद्रितानि।

डॉ० चन्दनलालपाराशरेण 'मंगलं भारतम्'[१३९] इत्येतत्काव्यं प्रणीतम् यत्र भारतस्य सांस्कृतिकी, भौगौलिकी, सामाजिकी च सुषमा- 'भाति विश्वं प्रियं मंगलं भारतम्' इति मुकुटालंकृतैः अष्टषष्ट्युत्तरैकशत- (१६८) पद्यैः किंच भारताष्टकेन समुन्मील्यते। इदं काव्यमास्माकीनस्य 'भाति मे भारतम्'[१८०] इति काव्यस्य परम्परां विस्तारयति इति दर्शं दर्शं मोदामहे। तद्यथा

वेशभूषाशनोपासनापद्धति- क्रीडनामोदसंस्कारवृत्त्यादिषु।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा भूतले भाति तन्मामकं भारतम्।।

(भाति मे भारतम्/5)

वेशभूषा विभिन्नं विभिन्नं मतं भिन्नभाषारुचिः सौरभं संस्कृतम्।
भिन्नतायां समानैकता भारते विश्वबन्धुत्वभावः सदा शोभते ।
दीप्तिदं रीतिदं गीतिदं भारतम् । भाति विश्वे प्रियं मंगलं भारतम्।।

(मंगलं भारतम् 48, पृ0-24)

विद्युदुत्पादने तैलसंशोधने इन्धनान्वेषणे लौहनिष्पादने।
यन्त्रनिर्माणकार्ये समर्थं च सद् भूतले भाति मेऽनारतं भारतम्।।

(भाति मे भारतम् 12)

तैलशोधे तथा विद्युदुत्पादने लौहनिर्माणकार्ये वियद्धावने।
ज्ञान-विज्ञानसत्त्वेऽग्रगण्यं प्रियं शक्तिकेन्द्रं सुशक्तं दधानं प्रियम्।।
अग्रं सर्वगं शक्तिगं भारतम्। भाति विश्वे प्रियं मंगलं भारतम्।।

(मंगलं भारतम् 61, पृ0 31)

'प्रज्ञाभारती' डॉ० श्रीधरभास्करवर्णेकरेण अष्टसु अध्यायेषु १५१ एकपंचाशदुत्तरैकशतानुष्टुब्वृत्तेषु प्रणीता 'संघगीता'[142] राष्ट्रीयस्वयंसेवकसंघस्य परिचयं ददाति। तद्यथा-

मैत्री समानशीलेषु करुणा दुर्बले जने।

मुदिता सज्जनोत्कर्षे स्यादुपेक्षा विरोधके।। (१४३)

काव्यसंकलनानि

आलोच्यकाले नैकेषां कवीनां काव्यसंकलनान्यपि प्रकाशितानि यत्र पूर्वप्रकाशिताः किञ्च प्रत्यग्रा रचनाः संकलिताः सन्ति। शिवशुकीय-सीमा-सन्ध्या-पाथेयशतक-कर्तुः डॉ० रामकरणशर्मणः 'वीणा' किञ्च 'दीपिका' इत्येते संकलने कवेः विशदमनुभवं विशालां च काव्यदृष्टिं पुरस्कुरुतः। 'वीणा' त्रिषष्ट्युत्तर-द्विशत (263) कवितानां 'दीपिका'[143] च अष्टोत्तरशत (108) कवितानां संग्रहौ स्तः। अत्र अन्योक्तयः, स्तुतयः, प्रस्तुतयः, संस्तुतयः, प्रकृतिवर्णनम्, प्रबोधनम्, हास्यव्यङ्ग्योक्तयः इदं सर्वमपि लब्धुं शक्यते। भक्तिभावः कथमत्रोच्छलतीति दिङ्मात्रं प्रस्तूयते। 'शिव त्वां वन्दे' इत्येतत्स्तुतौ शिवं प्रति भक्तो भणति-

प्रियास्ते नागेन्द्रा मम मनसि ते सन्ति बहवो

विषं प्रेयः पेयं तदपि बहुशः सचिंतमिह।

दिधक्षुस्त्वं कामं तमपि भव पश्येह सशरं

दुरन्ताशाभस्मावचय इह शम्भो! सुनिहितः।।[144]

साहित्य-अकादम्या 'षोडशी'[145] ति नाम्ना 'समकालिकसंस्कृत- काव्यसंग्रहः' प्रकाशितः। अत्र हि वेंकटरामराघव-वीरेन्द्रकुमारभट्टाचार्य- बटुकनाथशास्त्रिखिस्ते-रतिनाथझा-मधुकरगोविन्दमाइणकर- उमाशंकरत्रिपाठि-श्रीधरभास्करवर्णेकर-रेवाप्रसादद्विवेदि- के. राजनशास्त्रि - जगन्नाथपाठक- रामकरणशर्म-'अभिराज'राजेन्द्रमिश्र-रसिकविहारीजोशि-श्रीभाष्यम् विजयसारथि-हर्षदेव. माधव-केशवचन्द्रदाशेति-षोडशकवीनां रचनाः संकलिताः सन्ति।

कविरत्न ओम्प्रकाशठाकुरस्य 'गीतिमञ्जरी'[146] षट्त्रिंशद् गेयरचनानां 'इन्द्रधनुः'[147] च पंचसप्तति गीतानां संकलनमस्ति। उभयत्रापिं सरल-संस्कृतेन

जीवनस्य नैके आयामाः स्पृष्टाः कविना। बालका अपि सौकर्येण इमानि गीतानि गातुं शक्नुवन्ति।

ई०पी० भरतपिषारटिना प्रणीतं 'नवरत्नम्'[१८८] नवखण्डेषु विभक्तमस्ति। प्रथमे मौक्तिकखण्डे अभिनयगानानि, द्वितीये माणिक्यखण्डे एकांकनाटकानि, तृतीये वैडूर्यखण्डे एकांकगीतानि, चतुर्थे गोमेदखण्डे प्रभाषणानि, पंचमे इन्द्रनीलखण्डे भक्तिगानानि, षष्ठे विद्रुमखण्डे कथाकथनं, सप्तमे पुष्परागखण्डे आदर्शलेखाः नवमे च मरकतखण्डे समूहगानानि संकलितानि। लेखकेन ग्रन्थस्य आंग्लभाषानुवादोऽपि कृतः।

ग्रन्थस्य वज्रखण्डे 'पत्रिकास्वयंवरः' साम्प्रतिकसंस्कृतपत्रिकाणां विषये सूचनाः प्रददाति। तद्यथा

स्वयंवरे संस्कृतपत्रिकाणां विवोढुकामान् परिचाययन्ती।
प्रभूतदुग्धा चरितेष्वमुग्धा जगाद तान् संसदि कामधेनुः।

'कामधेनुः' श्रीभरतपिषारटिसम्पादिता पत्रिकास्ते या क्रमशः 'सुधर्मा'- 'भारतमुद्रा' - 'विश्वभाषा' - 'परमार्थसुधा' - 'अर्वाचीनसंस्कृत' - 'संगमनी'- 'भारतोदय' - 'भास्वती' - 'सागरिका' - 'शारदा' - 'गीवार्णसुधा' - 'संस्कृत भवितव्य' - 'उत्कलोदय' - 'संस्कृतामृत'- 'विश्वभाषा' - पत्रिकाणां परिचयं प्रस्तौति। तद्यथा

पश्याग्रतस्ते ननु भासतेऽर्वाचीनात्मिका संस्कृतपत्रिकेयम्।
शुक्लो रमाकान्तसुधीः सुधीरः पुष्णाति दिल्लीनगरे सुखं याम्।।
नेयं प्रमत्ता शबलैर्विचित्रैर्विभूषणैर्नागरिकत्वमुग्धा।
उदात्तभावैरनवद्यकाव्यैरुपात्तसौभाग्यमियं विभाति।।
पुनः सखे विश्वमिमं पुनाना पुनानगर्याः शबला प्रमेयैः।
अपोहितुं सन्तमसं जनानां विशारदा राजति शारदेयम्।।
लेखैरनेकैरनुवाचकानामत्यन्तहृद्या ननु पाक्षिकीयम्।
सम्पाद्यते चारु वसन्तपूर्वैरनन्तगाड्गीळमहानुभावैः।।

पाठशालासु कलाकार्यक्रमावसरेषु रंगावतरणार्थम् विरचितानां बहुरूपाणां संस्कृतरचनानां संकलनमिदं संस्कृतस्य प्रचार-प्रसारर्थमुपयोगि विद्यते।

डा० इच्छारामद्विवेद 'प्रणव'स्य 'गीतमन्दाकिनी'[१५१] तस्य इतः पूर्वं यत्र तत्र प्रकाशितानामप्रकाशितानांच्च गीतानां संकलनमस्ति यत्र भक्ति-शृंगारपरकाणां गीतानां प्राधान्यं विद्यते।

डा० उमा देशपाण्डे-महाभागा स्व 'अर्चनम्'[१५२] नाम्नि त्रयश्चत्वारिंशत् स्फुटकाव्यानां संग्रहे स्व कर्मस्थलं वटोदरम्, गुर्जरभूमिं, भारतं च मनोयोगेन वर्णयति, ईश्वरं महापुरुषाँश्च वन्दते। सत्स्वपि केषुचिद्व्याकरणस्खलनेषु काव्यमिदं पठनीयमेव। रचनायामाद्यन्तं प्रसादगुणो व्याप्तः। तद्यथा-

वर्षति मेघो मधुमधुरम्।
नृत्यति विद्युत् हसति धरित्री नभस्तलं सखि तिमिरमयम्।।
सान्द्रं विपिनं स्तब्धा सरसी मुग्धं भाति रविबिम्बम्।।[१५३]

श्रीशुकदेवशर्म 'मुनि' प्रणीतं 'मंगलानक्षत्रम्'[१५४] त्रिषष्टि ६३ कवितानां संकलनं विद्यते यत्र विविधविषयेषु कविना सरलसंस्कृतेन रचना कृता। सुभाषितान्यपि बहूनि सन्ति। तद्यथा—

मातुस्तृषाऽपत्यसुमंगलाभाः स्वसुस्तृषा सोदर-भान-भावाः।
नेतुस्तृषा राष्ट्रसुखे विभागाः दातुस्तृषा याचक-काम-भाषाः।।
गुरोस्तृषा शिष्य-विकास-लाभः साधोस्तृषा मोक्षविमोक्षलाभः।
हंसे तृषाथो पयसां विभागः विज्ञे तृषा नूतन-योग-लाभः।।
मेघे तृषा चातक-वारिदानं गोपे तृषा गोकुलपालनं वा।
वैद्ये तृषा रोगिरुजो निवृत्तिः कृषे तृषा क्षेत्र-विकास-वृत्तिः।।
रवेस्तृषा लोक-तमो-विनाशः हरेस्तृषा भक्तहितेक्षणं च।
कवेस्तृषा काव्य-विपाक-पाकः, मुनेस्तृषा मोक्ष-पदार्थ-लाभः।।[१५५]

संस्कृतवृत्तानां सौन्दर्यमनितरसाधारणमस्ति। तत्रैकं वृत्तमस्ति अश्वधाटी। तल्लक्षणं यथा-

'अश्वोत्तरा भवति धाटी यदा तभयजा सा रनौ गुरुयुतौ'

अस्मिन् वृत्ते अनुप्रासस्य चमत्कारो विशेषेण दृश्यते। नैकशताब्दी इदं वृत्तं लोकप्रियं वर्तते। अद्यापि डॉ० भास्कराचार्यत्रिपाठिप्रभृतिभिः कविभिरस्मिन् वृत्ते रचना क्रियते।[१५६]

आद्यशंकराचार्यस्य 'अम्बाष्टकं', जगन्नाथपण्डितस्य 'वन्दनावलिः', म०म० रामशास्त्रितैलंगस्य 'शिवाश्वधाटी', म०म० दुर्गाप्रसादद्विवेदस्य 'देवीस्तुत्यश्वधाटी', पं० आनन्दझाकवेः 'श्रीस्तुतिः', हेब्बारशास्त्रिणो 'लक्ष्मीस्तुतिः', भट्टमथुरानाथशास्त्रिणश्च 'हयग्रीवाश्वधाटी' प्रसिद्धा अश्वधाटयः सन्ति। एतासां संकलनं डॉ० विनोदरावपाठकेन 'अश्वधाटीघटा'[१५७] शीर्षकेण कृतम्। चतुर्विंशत्युत्तरैकशत (१२४)-संख्याका अश्वधाट्योऽत्र संकलिताः।

राधावल्लभस्य 'लहरीदशकं'[१५८] वसन्त - निदाघ - प्रावृड् - धरित्रीदर्शन - जनता - रोटिका - नर्मदा - मृत्तिकाद्यापि प्रस्थानेति दश लहरीणां संकलनमस्ति यत्र, द्विपंचाशत्प्रायाणि पद्यानि प्रत्येकं शीर्षके रचितानि। यद्यपि लहरीतिनाम्ना प्रसिद्धासु रचनासु प्रायशः प्रयुक्तं शिखरिणीवृत्तं लहरीदशके सर्वथानुपस्थितमस्ति तथापि विषयविशेषं विविधदृशा विस्तारन्त्योऽत्र संकलिता रचना कवेः नवनवोन्मेषशालिनीं प्रतिभां पिशुनयन्ति। अत्र संकलिताः काश्चन रचना इतः पूर्वं 'दूर्वा' पत्रिकायाापि प्रकाशितास्सन्ति।

'कालिदास एण्ड मैक्समूलर इण्टरनेशनल संस्कृत सोसायटी' ति संस्थया 'राष्ट्रियमैक्यम्' इतिशीर्षकं संकलनं प्रकाशितं यत्र नवकवीनां राष्ट्रभक्तिपरकाश्चतुर्दश रचनाः संकलिताः सन्ति।[१५९]

मुक्तच्छन्दोरचनासु विद्वन्मणेः केशवचन्द्रदाशस्य 'ईशा'[१६०] हर्षदेव माधवस्य 'अलकनन्दा' 'शब्दानां निर्मक्षिकेषु ध्वंसावशेषेषु'[१६१] च, डॉ० प्रकाशपाण्डे-कवेः 'विग्नदेईमन्'[१६२] इत्येतदादिका रचना लोचनपथमवतरन्ति। नैकपत्रपत्रिकास्वपि एतादृशा रचना प्रकाशिता भवन्ति यत्र नवीनविषयैः साकं नूतना रचनापद्धतिः कविभिरंगीकृता वर्तते।

स्तोत्रकाव्यानि

'कविरत्न' श्रीकृष्णसेमवालेन 'हनुमत्सुप्रभातम्'[१६३] प्रणीतं यत्र एकपंचाशत् (५१) पद्यैः श्रीहनुमतश्चरित्रं सभक्तिभावं गीयते। यद्यथा-

मुखेऽपि रामो हृदयेऽपि रामो विभाति कार्येष्वपि यस्य रामः।
कपीश्वरो राममयः स एव करोतु नित्यं मम सुप्रभातम्।।[१६४]

श्रीसुन्दरराजप्रणीतं स्तोत्रद्वयं 'श्रीहनूमत्पंचाशत् शरणागतिषोडशी च'[१६५]

श्रीहनूमन्तं प्रति श्रीमन्नारायणं च प्रति कवेः प्रपत्तिभावं द्योतयति।

रमाकान्तशुक्लस्य 'महाकाल-मालिकास्तोत्रम्'[१६६] दूर्वायां प्रकाशितम्।

कथाः

आचार्यकेशवशर्मशास्त्रिणाः 'सरिता'[१६७] विविध भावोद्बोधिनीनां षोडशकथानां संग्रहोऽस्ति। विद्वन्मणेः डॉ० केशवचन्द्रदाशस्य 'महान्'[१६८] किंच 'एकदा'[१६९] इति ग्रन्थद्वये २१ बालकथाः संकलिताः सन्ति। तस्यैव 'मधुयानम्' 'विसर्गः' इत्युपन्यासद्वयमपि[१७०] कथाकाव्यपरम्परां विस्तारयति। सरललघुवाक्यानि डॉ० दाशस्य शैल्यै वैशिष्ट्यं ददति। सर्वासु रचनासु तस्य दार्शनिकता प्रतिबिम्बिता भवति।

श्रीमधुरशास्त्रिणा श्रीजयप्रकाशभारतीलिखिताः एकविंशतिकथाः 'बालैकविंशतिः'[१७१] इत्येतच्छीर्षकेण संस्कृतेऽनूदिताः। सचित्रा इमा कथा बालानां सुखबोधाय स्थूलाक्षरैः मुद्रापिताः सन्ति। सरल-सरलानि वाक्यानि कथाः सुबोध्याः सम्पादयन्ति।

हास्यव्यङ्ग्य-रचनाः

'अभिराज' राजेन्द्रमिश्रस्य 'वाणीघटकमेलकम्'[१७२], डॉ० मधुसूदन मिश्रस्य 'श्वेतविप्लुतम्'[१७३] (प्रकाशनाधीनं) डॉ० प्रशस्यमित्रशास्त्रिणः 'कोमलकण्टकावलिश्च'[१७४] हास्य-व्यङ्ग्यरचनाः सन्ति।

डॉ० प्रशस्यमित्रशास्त्रिणो व्यङ्ग्यरचना 'कोमलकण्टकावलिः', नवकण्टकेषु (भागेषु) राजनीति-दाम्पत्य-प्रेमिका-विद्यालय-न्यायालय - आपण - माणवक-यात्रा - विप्रकीर्ण - विषयिण्यस्ताः दशा वर्णयति याः पठित्वा श्रुत्वा च पाठकः स्मेरमुखो भवत्येव।

विविधानि काव्यानि

डॉ० मधुसूदनमिश्रस्य 'स्वेतम्'[१७५] आत्मवृत्तात्मकं काव्यमस्ति यत्र तेन कटुमधुराणां प्रसंगनामपीङ्गितं कृतम्।

छन्दः

डॉ० रामकिशोरमिश्रस्य 'छन्दस्कलावती'[१७६] छन्दशास्त्रविषयको ग्रन्थोऽस्ति।

प्रो० मूँगारामत्रिपाठी विगतकतिपयेभ्यो वर्षेभ्यः संस्कृतकाव्यकर्मणि प्रवृत्तः। तस्य 'भारतवन्दनम्' 'मनो मे गहनतमसि संलिप्तम्' 'शरत्सौरभम्' इत्येता रचनाः 'रसरंग'[१७८] इति लघुपुस्तिकायां प्रकाशिताः।

काव्यानुवादाः भाषानुवादाश्च

महाभारतस्य,[१७८] रामायणस्य[१७९], नीतिशतकस्य[१८०], चाणक्यनीतेः[१८०] विदुरनीतेः[१८२] उपनिषदां[१८३], गीतायाः[१८४], मेघदूतस्य[१८५], भगवदज्जुकीयस्य[१८६], लटकमेलकस्य[१८७], मदनकेतुचरितस्य[१८८], सुषाविजयस्य[१८९], उभयरूपकस्य[१९०], अन्येषां च ग्रन्थानां गढ़वालीभाषानुवादाः, हिन्दीभाषानुवादाः, हिन्दीपद्यानुवादाश्च सञ्जाताः।

'कोमलकण्टकावल्या' अनुवादो[१९१] डॉ० रमापतिमिश्रेण कृतः। भर्तृहरिशतकानां हरियाणवीभाषायां पद्यानुवादः 'यात्रा के पड़ाव'[१९२] इतिशीर्षकेण डॉ० जयनारायणकौशिकेन कृतः। रमाकान्तशुक्लस्य संस्कृतकवितानामांग्ल भाषारूपान्तरणं डॉ० रमा झा डॉ० एस.पी. दीक्षितश्च कृतवन्तौ।[१९३] श्रीमधुर शास्त्रिणा 'भारतीय कविताएँ' इत्यस्मिन् ग्रन्थे ६९-९१ कालावधौ प्रकाशितानां संस्कृतरचनानां हिन्दीपद्यानुवादो विहितः।[१९४]

सुभाषितसंग्रहाः

सुभाषितसंग्रहाणां प्रथमं प्रकाशनं पुनर्मुद्रणंचाप्यालोच्यकाले संस्कृत साहित्यस्य कलेवरं पुष्णाति। महोपाध्यायललितप्रभसागर-सम्पादितः 'विश्वसंस्कृत सूक्तिकोशः'[१९५] त्रिषु खण्डेषु प्रकाशितोऽस्ति। श्रीलछमनसिंह अग्रवालस्य 'ऋतम्भरा'[१९६] तस्य पूर्वकृतिषु समागतानां सुभाषितानां संग्रहोऽस्ति। 'सुभाषित रत्नभाण्डागार'[१९७]स्यापि पुनर्मुद्रणं जातम्।

साहित्यकोशाः

'प्रज्ञाभारती' डॉ० श्रीधरभास्करवर्णेकरस्य 'संस्कृतवाङ्मयकोश' स्य तृतीयखण्डः[१९८] भागद्वये प्रकाशितोऽस्ति यत्र धर्मार्थकाममोक्षेतिचतुर्षु विभागेषु संस्कृतस्य पारिभाषिकशब्दानां परिचयो दीयते। प्रसंगतः साहित्यशास्त्र-नाट्यशास्त्रादिसम्बद्धाः शब्दा अप्यत्र विवेचिताः सन्ति। सुविदितमेव विदुषां यदितः पूर्वमस्य कोशस्य खण्डद्वयं प्रकाशितमस्ति यत्र प्राचीनार्वाचीनसंस्कृत-ग्रन्थ-

ग्रन्थकाराणां विषये महत्त्वपूर्णा सामग्री संकलितास्ति। डॉ० सत्यपालनारंगो महाकाव्यपादकोशं कालिदास-बिब्लियोग्राफीं च पूरयितुं यतते।[१९९]

टीकाग्रन्थाः, सम्पादितसंस्करणानि

अनेकेषां काव्यानां टीका अपि सम्पाद्य प्राकाश्यन्त। सौन्दरनन्द[२००] - चौरपंचाशिका[२०१] - पंचतन्त्र[२०२] - सौन्दर्यलहरी[२०३] - साम्बपंचाशिका[२०४]- जानकीहरण[२०५] - विरूपाक्षपंचाशिका[२०६] - कृष्णकुतूहल[२०७] - महाभारत तात्पर्यप्रकाश[२०८]- हितोपदेश[२०९]-प्रभृतिग्रन्थानां सटीकसंस्करणानि प्रकाशितानि जातानि। वेदान्तदेशिकस्य 'यादवाभ्युदयमहाकाव्यमवलम्ब्य डॉ० वासुवदेवा चारियरमहाभागेन विचारितम्।[२१०]

केरलवर्मविरचितं 'क्षमापणसहस्रं'[२११] डॉ० पूवत्तूर रामकृष्ण पिल्लै महाभागेन सम्पादितम्।

साहित्यशास्त्रनाट्यशास्त्रग्रन्थाः

डॉ० शिवजी उपाध्यायस्य 'साहित्यसन्दर्भः'[२१२], डॉ० मनोहरकालेमहाभागस्य 'भारतीय काव्यशास्त्र के नये आयाम.' (प्रथम भाग रससिद्धान्त)[२१३] ज्ञानचन्द्रशास्त्रिणः 'पाश्चात्यकाव्यशास्त्रम्'[२१४], डॉ० सत्यव्रतशास्त्रिणः 'एकावली'[२१५], डॉ० राधावल्लभत्रिपाठिनः, 'संक्षिप्तनाट्यशास्त्रम्'[२१६] आचार्यरामगोविन्दशुक्लसम्पादितः काव्यप्रकाशः (चण्डीदासकृतया दीपिका टीकया विभूषितः),[२१७] डॉ० पारसनाथद्विवेदिसम्पादितं श्रीभरतमुनिप्रणीतं नाट्यशास्त्रं (श्रीमदभिनवगुप्तकृतया 'अभिनवभारती'व्याख्यया डॉ० पारसनाथद्विवेदिकृतया 'मनोरमा' हिन्दीव्याख्यया च विभूषितम्)[२१८], डॉ० रमेशकुमारपाण्डेयस्य 'भरतमुनि साहित्यशास्त्र के आदि आचार्य'[२१९] एते ग्रन्थाः साहित्यतत्त्वं विमृशन्ति। डॉ० गोविन्दचन्द्रपाण्डेयस्य व्याख्यानत्रयं 'भक्तिदर्शनविमर्शः'[२२०] इतिग्रन्थरूपेण प्रकाशितमस्ति। श्रीबटोहीझा 'पंचमी साहित्यविद्या'[२२१] इत्येतत्संज्ञके एकोनाशीत्युत्तरद्विशत २८९ कारिकोपेते स्वप्रबन्धे काव्यशास्त्रानुदर्शनं प्रस्तौति। स पूर्वाचार्यव्याख्यातान् रसालंकारगुणादीन् सरलया शैल्या प्रस्तौति। एतेन सुकुमारबुद्धीनां छात्राणां हितमवश्यं स्यात्। डॉ० सुषमाकुलश्रेष्ठप्रणीतं 'मेघदूतसंगीतपल्लवी'[२२२] 'ऋतुसंहार-संगीतसुरभिः'[२२३] इत्येतद्ग्रन्थद्वयं साहित्यसंगीतयोर्मैत्री पुष्णाति।

पत्र-पत्रिकासु प्रकाशिताः साहित्यिकरचनाः

भारतेऽद्यत्वे नैकाः संस्कृत-पत्रिकाः प्रकाश्यन्ते यासु सुधर्मा, नवप्रभातम्, संस्कृतभवितव्यम्, गाण्डीवम्, युगगतिः, शारदा, संस्कृत-साकेतः हित साधिका, गोरखपुरचर्चा, सूर्योदयः, भारती, संस्कृतामृतम्, पारिजातम्, गीर्वाणसुधा, दिव्यज्योतिः, भारतोदयः, संस्कृतप्रचारकम्, गैर्वाणी, श्रीः, लोकसुश्रीः, संस्कृतदुन्दुभिः, साम्मनस्यम्, सत्यानन्दम्, श्रीपण्डितः, संस्कृतमन्दाकिनी, कालिदासः, ब्रजगन्धा, सारस्वतीसुषमा, अजस्रा, परमार्थ-सुधा, विश्वसंस्कृतम्, स्वरमंगला, दूर्वा, संगमनी अनादिवाक्, आरण्यकम् सागरिका, संस्कृतसंजीवनम्, विश्वभाषा, संस्कृतवाणी, श्यामला, युगप्रभा, संस्कृतश्रीः, कामधेनुः, प्रियवाक्, प्रियम्वदा, संस्कृतमञ्जरी, संविद्, शोधप्रभा सुरभारती इत्याद्याः पत्रिकाः प्रामुख्यं भजन्ते। नेपालादिदेशेष्वपि 'हैमवती' त्याद्याः पत्रिकाः प्रकाश्यन्ते।[२२४]

एतासु पत्र-पत्रिकासु विविधविषयेषु विविधरूपेषु यत्संस्कृतसाहित्यं प्रकाश्यते तन्नास्ति कदाप्युपेक्षणीयम्। को न जानाति यत् साम्प्रतिकानि प्रसिद्धानि काव्यानि प्रथमं प्रायः संस्कृतपत्रिकास्वेव प्रकाशितानि जातानि। तदनु च पृथक्पुस्तकाकारेण प्रकाशितान्यभूवन्। अद्यत्वेऽपि धारावाहिकरूपेण विविधपत्रिकासु वृहत्काया रचनाः प्रकाश्यन्ते। विश्वसंस्कृतस्य विगतकतिपयेष्वंकेष्वद्यावधि डा० श्यामदेवपाराशर - प्रणीतस्य 'त्रिवेणी' महाकाव्यस्य द्वाविंशतिसंख्याकास्सर्गाः प्रकाशिताः सन्ति। अपरेऽप्यायत्यां प्रकाशनीय सन्ति। पत्र-पत्रिकासु प्रकाशितानां रचनानां सूचीनां निर्माणस्य अपेक्षा वर्तते। एतादृशी एका सूची 'अर्वाचीनसंस्कृते १९९२ यावत्प्रकाशिताः लेखा रचनाश्च (डॉ० चन्द्रमौलिः शुक्लः)' इति शीर्षकेण 'अर्वाचीनसंस्कृते' (15/2, 15.4.1993) प्रकाशितास्ति[२२५]। यदि सर्वासां पत्रिकाणां सामग्र्याः सूचीकरणं भवेत्तर्हि शोधार्थिनां कृते सौकर्यं भवेत्। गतमास एव 'अ० भा० संस्कृतपत्रकारसंघस्य' पंजीकरणं संवृत्तम् यस्याध्यक्षः पुण्यनगरवास्तव्यः 'शारदा'कारः पं० वसन्त अनन्त गाडगीळोऽस्ति। आशासे, तस्य यत्नैरिदं कार्यं सम्पत्स्यते।

सम्मेलन-गोष्ठ्यः

संस्कृत-शोधपत्रपाठार्थमेतस्मिन्नन्तराले नैकानि सम्मेलनानि, नैकाश्च विचारगोष्ठ्यः समायोज्यन्त। वियनायां विश्वसंस्कृतसम्मेलनस्य

(WSC) अष्टमे सम्मेलने (अगस्त १९९०), 'टौरेण्टो' इत्यत्र समायोजिते त्रयस्त्रिंशत्तमे ICANAS सम्मेलने च अधिसंस्कृतसाहित्यमनेकैर्विद्वद्भिः शोधपत्राणि पठितानि। हरद्वारे समायोजिते अखिलभारतीयप्राच्यविद्यासम्मेलनस्य पंचत्रिंशत्तमेऽधिवेशने शतशः पत्राणि साहित्यिकसंस्कृत (CLASSICAL SANSKRIT)-विभागे विद्वद्भिः पठितानि। चतुर्णवत्युत्तरैकोनविंशतिशततमेशवीयेऽब्दे जनवरीमासस्य(9-15.1.1994) नवमदिनांकतः पंचदशदिनांकं यावत् आस्ट्रेलियादेशे समायोज्यमाने विश्वसंस्कृतसम्मेलनस्य नवमेऽधिवशने विद्वद्भिः शोधपत्राणि प्रेषितानि प्रेष्यन्ते च। हागंकांगे आगामिनि अगस्तमासे (1993) आयोज्यमाने चतुस्त्रिंशत्तमे ICANAS सम्मेलने समुपस्थातुं नैके संस्कृतसाहित्य-विमर्शकाराः सन्नद्धास्तिष्ठन्ति।

दिल्लीस्थरामजसमहाविद्यालयस्य हीरकजयन्तीमुपलक्ष्य संस्कृतपरिषदा 'संस्कृतसाहित्ये राष्ट्रियैकता' इति विषयमवलम्ब्य त्रिनवत्युत्तरैकोनविंशतिशततमे शवीयेऽब्दे मार्चमासस्य षड्विंश-सप्तविंश-तारिकयोः (26-27.3.1993) द्विदिवसीया संगोष्ठी आयोजिता। दिल्लीस्थश्रीलालबहादुरशास्त्री -राष्ट्रिय संस्कृतविद्यापीठेन 24-25.11.1992 तारिकयोः डॉ० विश्वनारायणशास्त्रिणः 'पुराणेषु भारतस्यैकात्म्यम्' 'प्राग्ज्योतिषपुरस्य सांस्कृतिकमवदानम्' चेति विषयमालम्ब्य भाषणद्वयमायोजितम्। उज्जयिन्याः कालिदास-समित्या, कालिदास-अकादेम्या, दिल्लीसंस्कृत-अकादम्या, म०प्र० संस्कृत-अकादम्या, उ०प्र० संस्कृत-अकादम्या, राजस्थान संस्कृत-अकादम्या, मुम्बापुरीस्थदेववाणी-मन्दिरेण, पुरीस्थलोकभाषाप्रचारसमित्या मैनपुरीस्थ- सुरभारतीसेवासंस्थानेन दिल्लीस्थदेववाणी-परिषदा अन्याभिश्च ताभिस्ताभिः संस्थाभिः संस्कृतसाहित्य परकाण्यायोजनानि कृतानि। उज्जयिन्यां कालिदास-समारोहः, दिल्ल्यां पण्डितराज समारोहः, ग्वालियरे भवभूतिसंगोष्ठी इत्येतदादिकान्यायोजनानि संस्कृत -साहित्यविमर्शार्थमप्यवसरं ददति।

गान्धिनगरे 7-8.11.1992 दिनांकयोः स्वामिनारायणसम्प्रदायेन संस्कृतसम्मेलनमायोजितम्। दिल्ली संस्कृतअकादमी च 10-12.6.1993 तारिकासु अ० भा० संस्कृतसम्मेलन मायोजयति यस्योद्घाटनं भारतस्य महामहिमराष्ट्रपतिः डा० शंकरदयालशर्मा विधास्यति। अत्रापि पत्रवाचनाय समयो निश्चितः।

दिल्ल्यां राज्यशैक्षिकानुसन्धानप्रशिक्षण-परिषदा (SCERT) अध्यापकानां कृते 15-28.5.1992, 1-14.7.1993 तारिकासु विचारसंगोष्ठ्यः कार्यशालाश्चायोजिताः यत्र एतत्पंक्तिलेखकेन अर्वाचीनसंस्कृतसाहित्यमवलम्ब्य पंच भाषणानि प्रदत्तानि। अद्यत्वेऽपि परिषदः संगोष्ठ्यः प्रचलन्ति यत्रानेन जनेन 24.5.1993 तारिकायां संस्कृतपत्रपत्रिका अवलम्ब्य भाषितम्। रमेशनगर विद्यालयप्राचार्या श्रीमती शशिप्रभागोयलमहाभागा अस्यां दिशि महत्त्वपूर्णं योगदानं करोति।

विद्वांसः

अनेन संक्षिप्तसर्वेक्षणेनेदं सुतरां स्पष्टीभवति यत्संस्कृतसाहित्यस्य शोधसमीक्षाधारा रचनाधारा चाद्यापि सदानीरे स्तः। अस्माकं प्राचीनं संस्कृतसाहित्यं कालजयि वर्तते किन्तु साम्प्रतिकं संस्कृतसाहित्यमपि स्वीयं महत्त्वं दधाति। न तदल्पमप्युपेक्षणीयम्। अस्माकं केचिद्बान्धवाः अर्वाचीनसंस्कृतसाहित्यस्य अस्तित्वमेव स्वीकर्तुं नोत्सहन्ते। अर्वाचीनसंस्कृतं नास्ति प्राचीनसंस्कृतस्य परिपन्थि किञ्चिद्वस्तु, इदं हि तस्याविभाज्यमंगमस्ति। अस्यामेव विंशशताब्द्यां रचितं पुष्कलं संस्कृतसाहित्यं स्वातन्त्र्यपूर्वकाले देशस्य पराधीनताजन्यां पीडां व्यनक्ति। स्वातन्त्र्योत्तरं संस्कृतसाहित्यं देशस्य स्वातन्त्र्यावाप्तौ हर्षं, देशविभाजने पीडां, विकासकार्ये प्रीतिं, कुत्सितराजनीतौ क्षोभं, दीनहीनानां सेवार्थं प्रेरणां, स्वातन्त्र्यवीरान् प्रति कृतज्ञतां, देशसेवकान् प्रति आदरभावं, देशद्रोहिणः प्रति घृणाभावं, भारतस्य, विश्वस्य च मंगलकामनां निदधत् संस्कृतसाहित्ये कामपि अदृष्टपूर्वां विच्छित्तिं संयोजयति। नवनवानि काव्यरूपाणि, नूतनानां वृत्तानामाविष्करणं, नवनूतनविषयेषु भावोद्गिरणम्-एतत्सर्वमपि तदैव प्रत्यक्षं भवितुं शक्यते यदास्मद्विद्वांसः प्रचीन-संस्कृतसाहित्येन साकमर्वाचीनरचनानामपि अवलोकनं कुर्युः। विश्वविद्यालयेषु तादृशी पाठ्यक्रमयोजना स्याद्यया एम०ए० - आचार्यकक्षीयाश्छात्रा विगतवर्षद्वयान्तराले प्रकाशितस्य प्रणीतस्य वा कस्यापि संस्कृतग्रन्थस्य परिशीलनमनिवार्यत्वेन कुर्युः।

बान्धवाः, नाहमस्मि निराशावादी। आशा हि मम कृते परमं सुखम्। यस्मिन् काले वयं श्वसिमस्तस्मिन् काले संस्कृतं लोकप्रियमस्ति। आकाशवाणी-दूरदर्शनतः संस्कृत-कार्यक्रमाः प्रसार्यन्ते, पौनःपुन्येन प्रसार्यन्ते। न कोऽपि दूरदर्शनद्रष्टा

संस्कृतकार्यक्रमान् वीक्ष्य स्व टी०वी० - यन्त्रं मौनभावं गमयति। विदेशेष्वपि अस्माकं संस्कृतकार्यक्रमाः प्रसार्यन्ते। अद्य संस्कृतविदुषां कवीनां च पंच रक्षापंक्तयः - उत्तमवृद्धपंक्तिः, मध्यमवृद्धपंक्ति, प्रौढपंक्तिः, युवपंक्तिः, किशोरपंक्तिश्च समानोत्साहेन साहित्यचिन्तने काव्यनिर्माणे च संलग्नास्तिष्ठन्ति। एकतोऽद्य आचार्यरमेशचन्द्रशुक्लः, आचार्यबटुकनाथशास्त्री खिस्ते, पं० जग्गूबकुलभूषणः प्रो०ई०पी० भरत पिषारटिः, आचार्यप्रभुदत्तस्वामी, कविशिरोमणिः अमीरचन्द्रशास्त्री, डा० प्रभुदयालु अग्निहोत्री, डा० प्रभाकरनारायण कवठेकरः, डा० हरिहरत्रिवेदी, डा० श्रीधरभास्करवर्णेकरः, आचार्यबच्चूलाल अवस्थी, आचार्यजानकीवल्लभ शास्त्री, डा० प्रभातशास्त्री, कविरत्नकृष्णप्रसाद घिमिरे पं० रामकृष्णशास्त्री 'अव्ययः' इत्येवमादयो उत्तमवृद्धाः कवयो दृश्यन्ते, अपरतः श्री० भि०वेलणकरः, डा० रुद्रदेवत्रिपाठी, डा० सत्यव्रतशास्त्री, डा० रामकरणशर्मा, काश्यपो डा० रेवाप्रसाद द्विवेदी 'सनातनः', आचार्यश्रीनिवास रथः, डा० श्यामदेव पाराशरः, प्रा० हरिश्चन्द्ररेणापुरकरः, डा० शिवदत्तशर्मा चतुर्वेदः, डा० जी० बी० पलसुले, पं० ओगेटिपरीक्षितशर्मा, गोस्वामी बलभद्रप्रसाद शास्त्री, डा० वनेश्वर पाठकः, डा० बदरीनाथ कल्ला, इत्येवमादयो मध्यमवृद्धाः कवयो रचनाकर्मणि व्यापृता अवलोक्यन्ते। एकतो डा० भास्कराचार्यत्रिपाठी, 'अभिराज' डा० राजेन्द्रमिश्रः, डा० प्रेमनारायणद्विवेदी, डा० रामकिशोरमिश्रः, श्रीभाष्यम् विजयसारथिः, डा० वी० कण्णन्, श्री० सुन्दरराजः, डा० पुष्पादीक्षितः, डा० नलिनी शुक्ला, डा० मनोरमा तिवारी, डा० लीना रस्तोगी, डा० कृष्णकान्तशुक्लः, डा० उमाकान्त शुक्लः, डा० विष्णुकान्त शुक्लः, श्रीदेवदत्त भट्टिः, डा० पद्म शास्त्री डा० शम्भुनाथ आचार्यः, डा० रामेश्वरदत्त शर्मा, कविरत्न ओमप्रकाशठाकुरः, डा० प्रकाशपाण्डे, श्रीमती वेदकुमारी घई ड़ा० कृष्णलालः कृष्णदत्तशर्मा, इत्येवमादयः प्रौढवयसः कवयः कविताः कुर्वन्ति, अपरतो डा० राधावल्लभ त्रिपाठी, डा० कामताप्रसाद त्रिपाठी, श्री कृष्णसेमवालः, डा० हरिदत्तशर्मा, डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः' डा. इच्छाराम द्विवेदी 'प्रणवः', डा० केशवचन्द्रदाशः, डा० हर्षदेव माधवः, डा० जयदेवजानी 'रसराजः', डा० जनार्दनप्रसाद पाण्डेयः 'मणिः', श्री वीरेन्द्रकुमारझा इत्येवमादयो युवानः

कवयः कविकर्मसाधनां कुर्वाणा अवलोक्यन्ते। यत्र तत्र कविसम्मेलनेषु कविमुखात् काव्यं श्रावं श्रावं किशोरा अपि काव्यरचनायां प्रवर्तन्ते। यत्सत्यं नात्र सर्वेऽपि कालिदासा माघाः बाणभट्टा वा किन्तु तैरिदं तु सडिण्डिमघोषमुद्घोष्यत एव यदद्यापि संस्कृतं कवीनां सहृदयानां च चेतांसि रंजयितुं क्षममस्ति। अयत्नाद्यत्नाद्वा यशसेऽर्थकृते वा गेयमगेयं वा क्लिष्टं सरलं वा सहृदयैर्ग्राह्य मग्राह्यं वा चारुतरमन्यथा वा काव्यं कुर्वाणानां महति जनसम्मर्दे को नाम कदा वा सत्कविर्भवेदित्यत्र केन सन्दिह्येत? यत्र तत्र नैकाः रचनाः प्रत्यहं प्रकाश्यन्ते। अस्मन्मित्रं राजेन्द्रमिश्रस्तु साम्प्रतिककालमाधुनिकसंस्कृत साहित्यस्य समृद्धिकालं मन्यते। वयमपि विंशीं शताब्दीं संस्कृतसाहित्यस्य स्वर्णकालं मन्यामहे। अस्मिन् सूचनायुगे संस्कृतज्ञैस्तदनुरागिभिश्च संस्कृतचलच्चित्राणामपि निर्माणं क्रियते। सद्य एव श्रीअय्यरस्य 'भगवद्गीता' चलच्चित्रं फिल्मपुरस्कारं लेभे। इतः पूर्वमपि तस्य 'आदिशंकराचार्य' इति चलच्चित्रं पुरस्कृतमभूत्। अवश्यमेवास्माभिराशा कर्तव्या यद् युगानुरूपं वयमपि संस्कृतरचना दृश्यश्रव्यमाध्यमैरपि विश्वप्रसृताः करिष्याम इति।

सुहृदो विद्वांसः,

श्रीमदम्बिकादत्तव्यासेन 'शिवराजविजय'स्य पंचमे निश्वासे लिखितमासीत्- 'इतस्तु दृश्यतां किं भवति पुण्यनगर' इति।[२२६] इदं वर्षं (2050 वि० 1993 ई०) शिवराजविजयस्य पूर्तेः शताब्दीवर्षम्। अद्यापीदं जिज्ञास्यते विद्वज्जगति 'इतस्तु दृश्यतां किं भवति पुण्यनगर' इति। आशासे यद्यदत्र भवति, भविता च तेन संस्कृतसाहित्यस्य श्रीवृद्धिर्भविष्यति। स्थालीपुलाकन्यायेन एभिरेव शब्दैः स्ववक्तव्यमुपसंहरन्नहमत्रभवतोऽत्र भवतीश्च शोधपत्रवाचनार्थं तद्विमर्शनार्थं च सादरमाह्वयामि। साहित्यकाराणां कृते मया पूर्वोक्ताः पंक्तय अत्रोपह्रियन्ते-

सत्यनिष्ठा जयेल्लेखनी निर्भया निर्भया वाग् जयेल्लोकसंरक्षिणी
साधुभावस्तथा ज्ञानपूतो जयेन्नूतने वत्सरे ते भवन्मंगलम्।[२२७]

भाण्डारकरप्राच्यसंशोधनसंस्थानम्, पुणे
B.O.R.I.,PUNE (INDIA)
28.5.1993

विदुषामाश्रवः
रमाकान्त शुक्लः

सन्दर्भाः

१ Contribution of Maharastra to Sanskrit and Sanskrit. Studies. Dr. Prabhakar Machwe. First International Sanskrit Conference, Ministry of Education and cultural Welfare 1975 P. p. 319-334

२ चारुचरितचर्चा: रामचन्द्र नारायण दाण्डेकर:, ले० आचार्यरमेशचन्द्र शुक्ल: । प्रकाशक: सुधा कमल ग्रन्थालय:, 273, उत्तरी गाँधी कालोनी मुजफ्फर नगर-२५१००१, १९७७ पृ० २८५

३ सम्पूर्णानन्द सं. वि. वि. वाराणसी १९९२

४ विजय प्रकाशन मन्दिर जी-२१/७६, कमच्छा वाराणसी १९९१

५. जय भारत साधु महविद्यालय: हरिद्वार-१९९२

६ ईस्टर्न बुक लिंकर्स दिल्ली-११०००७, १९९१

७ सं० सं० वि० वि० वाराणसी, १९९०

८ Agam Kala Prakashan, Delhi, 1990

९ सं. सं. वि. वि. वाराणसी-१९९२

१० भारतीय विद्या प्रकाशन-१९९२

११ Bankey Bihari Prakashan, Agra-3, 1990

१२ गुजरात साहित्य अकादमी, गांधी नगर-१९९०

१३ प्रतिभा प्रकाशन, दिल्ली-१९९२

१४ परिमल पब्लिकेशन्स, दिल्ली-११०००७, १९९१

१५ देववाणी-परिषद्, दिल्ली, आर ६, वाणी विहार, नयी दिल्ली-५९, १९९१

१६ मयंक प्रकाशन, मिश्रा बाग, हनुमान गढ़ी, कनखल, हरिद्वार-१९९२

१७ Eastern Book Linkers, Delhi-110007, 1991

१८ Brijrani Publications, 726, Seth Bhika Chand, Chhatta Bazar, Mathura, 1991

१९ नाग प्रकाशक, ११ ए/यू. ए., जवाहर नगर, दिल्ली-११०००७, १९९१

२० अनिल प्रकशन, ७ बी, आर० एफ०, बहादुर जी मार्ग, लखनऊ-१, १९९१

२१ The Author, 1991

२२ परिमल पब्लिकेशन्स, २७/२८, शक्ति नगर, दिल्ली-११०००७, १९९२

२३ E. B. L. Delhi-110007, 1991

२४ Amar Publications, A-1/139 B, Lawrance Road, Delhi-110035, 1991

२५ सावित्री प्रकाशन, सावित्री सदन, मीठापुर, बी एरिया, पटना-८००००१ १९९१

२६ श्री पब्लिशिंग हाउस, १०/४९, कटरा छज्जू पंडित, माडल बस्ती, नई दिल्ली-११०००५ द्वितीय संस्करण १९९२

२७ भारतीयवाङ्मयेषु रामकथावर्णनम् आचार्य आद्याचरण झा, प्रकाशकः इन्द्रकलाझान्याससमितिः, मंगरौनी-मधुवनी-८४७२११, १९९२

२८ भारतीय महाकाव्य, सं. नगेन्द्र, प्रभात प्रकाशन, १९९२, दिल्ली-७

२९ तत्रैव रामायण-वाल्मीकि, रामाश्रय शर्मा पृ० २७-४६

३० तत्रैव महाभारत-वेदव्यास, वाचस्पति उपाध्याय, २४५-२५९

३१ तत्रैव रघुवंश-कालिदास, रमाकान्त शुक्ल, ४७-५६

३२ तत्रैव नैषधीयचरितम्, श्रीहर्ष, रमाकान्त शुक्ल, २८१-२८९

३४ प्रभाकरनारायणश्रीः सम्पादक- डा. सुषमा कुलश्रेष्ठ, डा सत्यपाल नारंग, प्रतिभा प्रकाशन, नई दिल्ली, १९९३,

३५ प्रभाकरनाराणश्रीः पृ०. २७०-२७२

३६ तत्रैव, पृ० २७३--२८४

३७ तत्रैव, पृ० २८५--२९७

३८ तत्रैव, पृ० २९८--३११

३९ तत्रैव, पृ० ३१२--३१७

४० तत्रैव, पृ० ३१८--३२५

४१ तत्रैव, पृ० ३२६--३२८

४२ तत्रैव, पृ० ३२९--३३८

४३ सत्यसुधा, ले. डा. सत्यव्रत वर्मा, ईस्टर्न बुक लिंकर्स, दिल्ली-११०००७ १९९३

४४ कालिदासश्रीधरी (Dr. Shridhar Vasundev Sohoni Felicitation Volume), प्रधान सम्पादक, डा. सुषमा कुलश्रेष्ठ, सह सम्पा० डा० चन्द्रकान्त शुक्ल, डा आनन्द कुमार श्रीवास्तव, डा० उर्मिला श्रीवास्तव पृ० सं. ५२६, ईस्टर्न बुक लिंकर्स दिल्ली-११०००७-१९९३

४५ देववाणी-सुवासः, प्रधानसम्पादकः, 'अभिराज' डा० राजेन्द्र मिश्रः, प्रबन्ध सम्पादकः, डा. चन्द्रमौलि शुक्लः। प्रकाशक, 'डा० रमाकान्त शुक्लाभिनन्दनग्रन्थसमिति' - कृते देववाणी-प्रकाशनम्, आर ६, वाणी विहारः, नई दिल्ली-११००५९, १९९३

४६. द्र० देववाणी-सुवासः पृ० ३.००१–३.११६

४७ द्र० तत्रैव, पृ० ४.००१ - ००६

४८ द्र० तत्रैव, पृ० ४.०४४ - ०६१

४९ द्र० तत्रैव, पृ० ४.०६२ - ०६४

५० द्र० तत्रैव, पृ० ४.०६५ - ०६७

५१ द्र० तत्रैव, पृ० ४.०६८ - ०७४

५२ द्र० तत्रैव, पृ० ४.०८२ - ०९१

५३ द्र० तत्रैव, पृ० ४.०८२ - १०८

५४ द्र० तत्रैव, पृ० ४.११७ - १२७

५५ द्र० तत्रैव, पृ० ४.१२८ - १३६

५६ द्र० तत्रैव, पृ० ४.१४१ - १५७

५७ द्र० तत्रैव, पृ० ४.१५८ - १६४

५८ द्र० तत्रैव, पृ० ४.१८७ - १९७

५९ द्र० तत्रैव, पृ० ४.१९८ - २००

६० द्र० तत्रैव, पृ० ४.२४५ - २५४

६१ द्र० तत्रैव, पृ० ५.११७ - १३५, ५.६६९ - ६७२, ५.४५७

६२ द्र० तत्रैव, पृ० ५.११३ - १४७, ५.४८७

६३ द्र० तत्रैव, पृ० ५.१६१

६४ द्र० तत्रैव, पृ० ५.१६५

६५ द्र० तत्रैव, पृ० ५.१८१

६६ द्र० तत्रैव, पृ० ५.१८४

६७ द्र० तत्रैव, पृ० ५.१९५ - २३२

६८ द्र० तत्रैव, पृ० ५.०५९ - ०७९, ५.४०८ - ४१५, ५.४३९ - ४४७

६९ द्र० तत्रैव, पृ० ५.३६८ - ४०५

७० द्र० तत्रैव, पृ० ५.४९८ - ५१३

७१ द्र० तत्रैव, पृ० ५.२९९ - ३०१, ५.४०५ - ४०७

७२ द्र० तत्रैव, पृ० ५.२९५ - २९८, ५.५२३ - ५३५

७३ द्र० तत्रैव, पृ० ५.४७५

७४ द्र० तत्रैव, पृ० ५.३०२ - ३१२

७५ द्र० तत्रैव, पृ० ५.०२६-३१, ५.०३५-५८,५.४६६,५.४१६-४३८ आदि

७६ द्र० तत्रैव, पृ० ५.७१० - ७८६

७७ द्र० तत्रैव, पृ० ५.४४२ - ४४७, ५.५८७ - ७०९

७८ द्र० तत्रैव, पृ० ५.८११ - ८१६

७९ अस्य ग्रन्थस्य सम्पादको डा. सत्यपाल नारंगोऽस्ति

८० अस्य ग्रन्थस्य सम्पादको डा. राजेन्द्र नाणावटी अस्ति

८१ अस्य ग्रन्थस्य सम्पादको डा० सत्यपाल नारंगोऽस्ति

८२ १९९३ ईशवीयेऽब्दे प्रकाशित:

८३ देवयानी (नाटिका) ले० प्रकाशकः डा० रामकिशोर मिश्र: संस्कृत विभागाध्यक्षः महामना मालवीय महाविद्यालय:, खेकड़ा-२०११०१, १९९२

८४ मधुलिप्सा. वासुदेव आचार्य: प्रकाशकः, लोकभाषाप्रचारसमिति: शरधावालि, पुरी-७५२००२, १९९१

८५ मेघदूतान्वितम् (गीतनृत्यनाटकम्), श्री. भि. वेलणकर: देववाणी मन्दिरम्, मुम्बई.४०००४, १९९१

८६ दिल्लीपरिदेवनम् (ऐतिहासिकनाटकम्), 'अभिराज' डा० राजेन्द्र मिश्र:, संस्कृतमञ्जर्यां, प्रकाशितम् १९९२

८७ नाट्यसप्तकम् (ध्वनिनाट्यसंकलनम्), डा. रमाकान्त शुक्ल:, देववाणी-परिषद्, दिल्ली, आर. ६ वाणी विहारः, नई दिल्ली.११००५९, १९९२

८८ सत्प्रेरणानाटकम्, डा० इच्छाराम द्विवेदी, "प्रणवः" देववाणी-परिषद् दिल्ली १९९३ (प्रकाशनाधीनम्)

८९ प्रका० भारतीयविद्याप्रकाशन, बैंग्लो रोड, दिल्ली-११०००७, १९९०

९० नाट्यत्रयी (विडम्बना, प्रणयविच्छेदः, कण्वाश्रमः) - रामकृष्ण शर्मा। प्रका०-नाग प्रकाशक, ११ यू० ए० जवाहर नगर, दिल्ली-७, १९९३

९१ चाण्डालिका, प्रणेता-डा० वनेश्वर पाठकः, प्रकाशकः, ज्योति संगम पथ, अपर बाजार, राँची-८३४००१ १९९०

९२ विक्रांतकर्णम्, वनेश्वर पाठकः ज्योतिः, राँची-१९९०

९३. श्रीरामकीर्तिमहाकाव्यम्, प्रणेता-- सत्यव्रत शास्त्री, प्रका० मूलामल सचदेव प्रतिष्ठानम् अमरनाथ सचदेव प्रतिष्ठानम्, बैंकाक, १९९०

९४ तत्रैव १९/३८-३९

९५ दूताञ्जनेयम् (महाकाव्यम्), प्रणेता- "गोस्वामी", डा. बलभद्रप्रसाद शास्त्री, भूमिकालेखकः - डा. कृष्णकान्त शुक्लः, हिन्दी भाषानुवादकारः राजकमल गोस्वामी, प्रकाशकः - वाग्देवता प्रकाशन १४, अशोक नगर बरेली (उ. प्र.), १९९३

९६ भीष्मचरितम्, रचयिता, डा. हरिनारायण दीक्षितः प्रका० , ईस्टर्न बुक लिंकर्स, ५८२५, न्यू चन्द्रावल, जवाहर नगर दिल्ली-११०००७, १९९१

९७ संस्कृत साहित्य में राष्ट्रिय भावना, डा० हरिनारायण दीक्षित, देववाणी-परिषद् दिल्ली, ६वाणीविहार नई दिल्ली-५९, १९८४

९८ भीष्मचरितम् १/१२

९९ भीष्मचरितम् १/२०-२९

१०० निर्माणाधीनं महाकाव्यम् श्रीनेहरूचरितम्, डा. रमाकान्त शुक्लः, अर्वाचीनसंस्कृतम् ३/४, १५ अक्टू० १९८१ पृ० सं. २१७-२२८

१०१ श्रीनेहरूचरितमहाकाव्यम्, (श्रीनेहरूमहोदयानाम् आत्मकथायाः संस्कृतपद्यानुवादः), मूललेखकः पंडित जवाहर लाल नेहरूः, प्राक्कथनम्-महामहिमरामस्वामिवेंकटरामनमहोदयाः भारतराष्ट्रपतयः, अनुवादकः कविरत्नम् अमीरचन्द्र शास्त्री, प्रधानसम्पादकः डा० श्रीधरवासिष्ठः, प्रकाशकः कुलसचिवः श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, शहीदजीतसिंह मार्गः, कटवारिया सरायः, नई दिल्ली-११००१६, १९९०

१०२ सुदामचरितम् - डा० इन्द्रदेव द्विवेदी 'इन्द्रः', प्रकाशक - काशीनाथ द्विवेदी, भारतीय साहित्य परिषद्, गोमती नगर, लखनऊ, १९९२

१०३ शिववीरचरितम् (महाकाव्यम्) प्रणेता - कृष्णदत्त शर्मा शास्त्री, प्रका० दी शार्प प्रिण्टर्स, सुभाष बाजार मेरठ, १९९३

१०४ स्वराज्यसम्भवम्, रचयिता, सनातनः काश्यपो रेवाप्रसाद द्विवेदी वाराणसी १९९२

१०५ प्रका० काल प्रकाशनम्: १४०४, सदाशिव पेठ, पुणे ४११०३०, १९९२

१०६ महात्मायनम् - कविः केदारः तथा गंगाधर विष्णु ठेकेदारः प्रका. जयदीप प्रकाशनं, १०५ नारायण पेठः, पुणे-४११०३०, २.१०.१९९१

१०७ प्रका० लेखक एव

१०८ नाग प्रकाशकः दिल्ली-११०००७ - १९९२

१०९ अम्बिका प्रकाशन, बैरक्स, १४५१/१, उल्हास नगर, ४२१००४, १९९०

११० विच्छित्तिवातायनी - डा. जगन्नाथ पाठकः, डा० अनिल कुमार पाठकः मु. कोटा टोली, सासाराम, जि. रोहतास (बिहार) १९९१

१११ तत्रैव, पृ० २१३

११२ तारुण्यशतकम्, प्रणेता - क्षीरोदचन्द्रदाशः, प्रका. कटकस्थ विद्यापुरी प्रकाशनसंस्थापक्षतः श्रीपीताम्बरमिश्रशर्मणा प्रकाशितम् १९९१

११३ तत्रैव, पद्यसंख्या १००

११४ तत्रैव पद्यसंख्या १०१

११५ अहं राष्ट्री, प्रणेता - विशन लाल गौड़: 'व्योमशेखरः' प्रका. लोकालोक, प्रकाशन, १५६ श्याम पार्क, साहिबाबाद-२०१००५, १९९०

११६ तत्रैव ११६

११७ पञ्चशती, विद्यासागर, प्रका० ज्ञानगंगा ३० डिप्टी गंज, सदर बाजार, दिल्ली-११०००६, १९९१

११८ प्रका० प्रबोध संस्कृत - प्रकाशनम्, हरमू राँची १९९१

११९ प्रका० शिक्षक प्रकाशक, १०५/१९४ प्रेम नगर, कानपुर-१, १९९१

१२० पञ्चकुल्या - 'अभिराज' राजेन्द्र मिश्रः १९९३

१२१ भीमशतकम् - श्रीकृष्ण सेमवालः - दिल्ली संस्कृत, अकादमी, १९९१

१२२ मित्रदूतम् - डा. इच्छाराम द्विवेदी 'प्रणवः', प्रका० : सुरभारतीसेवासंस्थानम् १६७/१२ पंजाबी कालोनी, मैनपुरी - २०५००१, १९९२

१२३ मित्रदूतम्, १-२, पृ० १-२

१२४ तदेव, ४९, पृ० २५

१२५ अभिनवमेघदूतम्, - वसन्त त्र्यम्बक शेवड़े, सम्पा० डा० ब्रह्मानन्द त्रिपाठी, प्रका० चौखम्बा सुरभारती प्रकाशन, वाराणसी १९९०

१२६ वनेश्वर पाठकः प्रका० ज्योतिः, राँची, १९९०

१२७ तत्रैव, उत्तरो भागः, ६३ - ६६, पृ० ५१ - ५२

१२८ मृत्कूटम् (मानवशतकम्), रचयिता, डा. भास्कराचार्य त्रिपाठी, प्रका०- श्री गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्, इलाहाबादः १९९२

१२९ मृत्कूटम्, १००, पृष्ठ ५०

१३० तदेव, ३८, पृष्ठ १९

१३१ तदेव, ३९, पृष्ठ २०

१३२ तदेव, ९३, ९४, पृष्ठ ४७

१३३ सटीकम् अक्कमहादेवीशतकम्,-डा० परड्डी मल्लिकार्जुनः १९९२

१३४ सटीकं गंगाधरशतकम्, - डा० परड्डी मल्लिकार्जुनः प्रका० श्रीजगद्गुरुगंगाधर धर्मप्रचारकमण्डलम्, मूरूसाविरमठः, हुब्बली-५८००२० दिसम्बर १९९२

१३५ राजनीतिलीलाशताधिकम्, प्रणेता डा० दीपक घोष-, प्रका० देववाणी-परिषद्, दिल्ली, १९९२

१३६ तत्रैव, पद्य सं० २

१३७ तत्रैव, पद्य सं० १००

१३८ तत्रैव, पद्य सं० ८५-८९

१३९ मंगलं भारतम्, प्रणेता, डा. चन्दनलाल पाराशरः। प्रकाशकः, सुधा प्रकाशन आगरा, २.१०.१९९१

१४० भाति मे भारतम्, - रमाकान्त शुक्लः प्रका. देववाणी-परिषद्, दिल्ली ६ वाणी विहार नई दिल्ली ११००५९, द्वितीयं संस्क०

१४१ संघगीता (मराठी भाषान्तर सहिता), ले. श्रीधर भास्कर, वर्णेकर - "प्रज्ञाभारती" प्रका०, मनोहर कथा प्रकाशन, मुजुमदार बंगला, पोस्ट आफीसचे मार्ग, गिरी पेठ नागपूर १० १९९२

१४२ वीणा, - डा० रामकरण शर्मा, प्रका. - नाग प्रकाशक ११ ए / यू० ए०, जवाहर नगर दिल्ली-११०००७, १९९०

१४३ दीपिका, - रामकरण शर्मा, प्रका० - शारदा पब्लिशिंग हाउस दिल्ली - ११००५२, १९९२

१४४ दीपिका, पृ० २४

१४५ षोडशी, संकलयिता सम्पादकश्च राधावल्लभ त्रिपाठी, प्रका० साहित्य अकादमी ३५ फीरोजशाह रोड नई दिल्ली-११०००१, १९९२

१४६ गीतिमञ्जरी, कविरत्नम् ओम्प्रकाशठाकुरः, प्रका० - देववाणी - परिषद्, दिल्ली, आर ६, वाणी विहारः नयी दिल्ली-११००५९, १९९२

१४७ इन्द्रधनुः, कविरत्नम् ओम्प्रकाशठाकुरः, डी-७५७ सरस्वती विहारः, दिल्ली, १९९३

१४८ नवरत्नम्, प्रो० ई० पी० भरतपिशारटिः प्रकाशकः, कामधेनु पब्लिकेशन्स पो. ओ., एरनेल्लूर ६८०५०१ (केरल)

१४९ तत्रैव पृ० १३७

१५०. तत्रैव पृ० १३८

१५१ गीतमन्दाकिनी - डा० इच्छाराम द्विवेदी 'प्रणवः' प्रका० - नाग प्रकाशक-, दिल्ली - ११०००७, १९९२

१५२ अर्चनम् (संस्कृतकाव्यसंग्रह), कवयित्री - प्रा० डा० उमा देशपाण्डे, विश्व संस्कृत प्रतिष्ठानम् गुर्जरप्रदेश, शाखा, श्री अरविन्द निवासः, दांडिया बाजार, वटोदरम्-३९०००१, १९९२

१५३ अर्चनम् पृ० ५३.

१५४ मंगलानक्षत्रम् - प्रणेता - शुकदेव शर्मा, 'मुनिः' प्रकाशकः - वात्स्य, प्रकाशन - नई बस्ती, सिनेमा रोड, नाभा - १४७२०१, १९९१

१५५ मङ्गलानक्षत्रम् (मुनेस्तृषा), पृ० ५०

१५६ अर्वाचीनसंस्कृतम् (१५/२) कृष्णाश्वधाटी, डा० भास्कराचार्य त्रिपाठी सम्पादकः रमाकान्त शुक्लः

१५७. (अश्वधाटीघटा)-सम्पादक: डा. विनोदराव पाठक:, प्रका० शारदा प्रकाशन संस्थान, शारदा भवन डी ३६/४४, अगस्त्य कुण्ड, वाराणसी-२२१००१

१५८. लहरीदशकम् राधावल्लभ:, प्रका० संस्कृतपरिषद्, सागरविश्वविद्यालय:, सागरम्-४७०००३, १९९१

१५९. राष्ट्रियमैक्यम् - सम्पा० डा० मुहम्मद इसराइल खाँ, प्रका० कालिदास एण्ड मैक्समूलर इण्टरनेशनल संस्कृत सोसायटी एफ/डी ५६, नया कविनगर, गाजियाबाद, १९९३

१६०. ईशा - विद्वन्मणि: केशवचन्द्रदाश:, प्रकाशिका श्रीमती सुभद्रादाश, पुरी १९९२

१६१. अलकनन्दा (१९९०), शब्दानां निर्मक्षिकेषु ध्वंसावशेषेषु (१९९३)- डा० हर्षदेव माधव:, पार्श्व प्रकाशन, अहमदाबाद-३८०००७

१६२. विग्नदेईमन् - डा० प्रकाश पाण्डे, नागपुर

१६३. हनुमत्सुप्रभातम्- 'कविरत्न' श्रीकृष्ण: सेमवाल:, प्रका०-कालीशिला प्रकाशनम्, ८२ डी० डी० ए० फ्लैट्स, फेज़ २, मस्जिद मोठ, नयी दिल्ली-११००४८

१६४. तत्रैव, पद्यम् ४९ पृ० १३

१६५. श्रीहनूमत्पंचाशत् शरणागतिषोडशी च- श्री० सुन्दरराज:, प्रका० देववाणी-परिषद्, दिल्ली आर-६, वाणीविहार:, नयी दिल्ली-११००५९, १९९२

१६६. दूर्वा (कुम्भकलिका-विशेषांक:) सम्पादक: डा० भास्कराचार्य त्रिपाठी, प्रका० मध्य प्रदेश संस्कृत अकादमी, भोपाल (म. प्र.), १९९२

१६७. सरिता (संस्कृतकथामुक्तावलि:)- आचार्यकेशवशर्मा शास्त्री, प्रका० संस्कृतशोधसंस्थानम्, भारतीविहार:, मशोबरा, शिमला-१७१००७, १९९०

१६८. महान् डा० केशव शर्मा चन्द्रदाश:, प्रका० लोकभाषा प्रचारसमिति:, पुरी, १९९१

१६९. एकदा-डा० केशवचन्द्र दाश: प्रका० लोकभाषा प्रचारसमिति:, पुरी १९९१

१७०. मधुयानम् (१९९०) विसर्गः (१९९२) विद्वन्मणि डा० केशवचन्द्र दाशः, प्रका० लोकभाषा प्रचार समितिः, पुरी

१७१. बालैकविंशतिः-मधुर शास्त्री, प्रका० शारदा प्रकाशन, अंसारी रोड, दरिया गंज, नयी दिल्ली-११०००२, १९९२

१७२. वाणीघटकमेलकम् 'अभिराज' डा० राजेन्द्र मिश्रः

१७३. श्वेतविप्लुतम् - डा० मधुसूदन मिश्रः

१७४. कोमलकण्टकावलिः डा० प्रशस्यमित्र शास्त्री, हिन्दीपद्यानुवादकार-डा० रमापति मिश्र, अक्षयवट प्रकाशन, २६ बलरामपुर हाउस, इलाहाबाद - २११००२, १९९०

१७५. स्वेतम् - डा० मधुसूदन मिश्रः, तारा प्रकाशन, बी३० उत्तरांचल, फ्लैट ५, पटपड़गंज, दिल्ली-११००९२

१७६. छन्दस्कलावती-डा० रामकिशोर मिश्रः, खेकड़ा (मेरठ) २०११०१, १९९१

१७७. रसरंग-संयोजक प्रो० मूँगाराम त्रिपाठी, १९३ अरेरा कालोनी, भोपाल १६, २ मई १९९३

१७८. गढ़वाली महाभारत (गढ़वाली हिन्दी पद्यानुवाद) अनुवादकर्त्ता-आदित्यराम दुदपुड़ी, प्रका० शिव सत्संग कुटीर, सैजमल्ला, पो० आ० डाडा मण्डी, गढ़वाल-२४६१२४, १९९२

१७९. गढ़वाली रामैण-लेखकः प्रकाशकश्च १७८ वत्।

१८०. गढ़नीतिशतकम्-लेखकः प्रकाशकश्च १७८ वत्।

१८१. गढ़चाणक्यनीतिः- लेखकः प्रकाशकश्च १७८ वत्।

१८२. गढ़विदुरनीतिः-लेखकः प्रकाशकश्च १७८ वत्।

१८३. शिवसंकल्पादि पन्द्रह उपनिषद्-लेखकः प्रकाशकश्च १७८ वत्।

१८४. गढ़गीता (गीता सतसई)-लेखकः प्रकाशकश्च १७८ वत्।

१८५. मेघदूतानुशीलनम्-डा० कृष्णकुमार, प्रका० मयंक प्रकाशन, कनखल, १९९२

१८६-१९०. संस्कृत साहित्य में प्रहसन- डा०राधावल्लभ त्रिपाठी, कु० नीलम अग्रवाल, प्रका० अक्षयवट प्रकाशन, इलाहाबाद-२११००२२, १९९२

१९१. द्रष्टव्या पादटिप्पणी-१७४

१९२. यात्रा के पड़ाव (भर्तृहरिशतक का काव्यरूपान्तर) - डा० जयनारायण कौशिक, प्रका० साहित्य सहकार, ई १०/४ कृष्णनगर, दिल्ली-११००५१

१९३. द्र० देववाणी-सुवासः, सम्पा० 'अभिराज' डा० राजेन्द्र मिश्र, देववाणी प्रकाशनम्, आर ६ वाणी विहारः नयी दिल्ली-११००५९, १९९३ पृ० ५.१०९-११६

१९४. भारतीय कविताएँ, १९८६ सम्पादक बालस्वरूप राही, भारतीय ज्ञानपीठ, नयी दिल्ली ११०००३, १९९० 'भारतीय कविताएँ: १९८९-९०-९१' इति ग्रन्थोऽद्यत्वे मुद्रणाधीनोऽस्ति। पृ० २३१-२४४

१९५. विश्वसंस्कृतसूक्तिकोशः (भाग १-३) सम्पादकः महोपाध्यायः, प्रका० गर्ग एण्ड कम्पनी, जालोरी गेट, जोधपुर (राज०), १९९०

१९६. ऋतम्भरा- लेखकः प्रकाशकश्च-लछमनसिंह अग्रवालः ५४/१ सिही गेट, बल्लवगढ़-१२१००४

१९७. सुभाषितरत्नभाण्डागारम् - पुनर्मुद्रयिता - ईस्टर्न बुक लिंकर्स, दिल्ली १९९१

१९८. संस्कृतवाङ्मयकोशः (तृतीयः खण्डः) सम्पा० - डा० श्रीधर भास्कर वर्णेकरः 'प्रज्ञाभारती' भारतीय भाषा परिषद्, ३६ ए, शेक्सपीयर सरणि, कलकत्ता-७०००१७, १९९२

१९९. दिल्लीविश्वविद्यालयस्य संस्कृतविभागे रीडरपदं समलंकुर्वाणो डा० सत्यपालनारंगोऽस्मिन् कार्ये अनेकेभ्यो वर्षेभ्यो व्यापृतोऽस्ति।

२००. सौन्दरनन्दं महाकाव्यम् (विमला-टीका), सं. डा० जगदीश चन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९१

२०१. चौरपंचाशिका- सं. डा. कृष्णकुमार, मयंक प्रकाशन, मिश्रा बाग, कनखल हरिद्वार, १९९१

२०२. पंचतन्त्रम् (ज्योत्स्ना'-'मृदुला' - संस्कृत-हिन्दी-टीकोपेतम्) सं० डा० सुधाकर मालवीयः, कृष्णदास अकादमी, वाराणसी, १९९०

२०३. सौन्दर्यलहरी (लक्ष्मीधरा-सौभाग्यवर्धनी-अरुणा-मोदिनी - आनन्द गिरीया-तात्पर्यदीपनी-पदार्थचन्द्रिका-डिण्डिमभाष्य-गोपालसुन्दरी-आनन्दलहरी-कैवल्यवर्धिनी-टीकायुता), नाग प्रकाशन, दिल्ली। १९९१

२०४. साम्बपंचाशिका (टीका, विवृतिः) सं. म. म. गोपीनाथ कविराज। सं. सं. वि. वि., वाराणसी। १९९२

२०५. जानकीहरणम् (आशुबोधिनी) सं. आचार्य भालचन्द्र पाण्डेय, कृष्णदास अकादमी, वाराणसी, १९९१

२०६. विरूपाक्षपंचाशिका (टीका, विवृतिः) सम्पा - म. म. गोपीनाथ कविराजः। सं. सं. वि. वि., वाराणसी। १९९२

२०७. कृष्णाकुतूहलम्, सम्पा० - पं० श्री हरिशंकर ओझा, सं० सं० वि० वि०, वाराणसी, १९९०

२०८. महाभारततात्पर्यप्रकाशः सम्पा०- रत्ना पब्लिकेशन्स, बी २१/४२ए कमच्छा, वाराणसी-२२१०१०, १९९२

२०९. हितोपदेशप्रवेशः (सरल-संस्कृत-व्याकरण-संवलितः), संग्रहकर्ता, सम्पादकः- डा० शम्भुदत्त जोशी। प्रका. विश्वेश्वरानन्द वैदिक शोध संस्थानम् दिल्ली शाखा, हंसराज कालेजः, दिल्ली-११०००७, १९९१

२१०. Yadavabhyudaya (Mahakavya of Sri Vedantadesika) - Dr. N.V. Vasudevachariar., K.C. Publishers, Delhi, 1992

२११. क्षमापणसहस्रम्- सम्पा०-पूवत्तूर रामकृष्ण पिल्लै, प्रका०- अनिता पब्लिकेशन्स, प्रशान्त नगर, तिरुवनन्तपुरम्-६९५००१, १९९२

२१२. साहित्यसन्दर्भः डा० शिवजी उपाध्याय, प्रका० श्रीमती मीरा उपाध्याय, १४ अध्यापक आवास, सं० सं० वि० वि० वाराणसी-२, १९९०

२१३. भारतीयकाव्य शास्त्र के नये आयाम (प्रथम भाग रससिद्धान्त)-डा० मनोहर काले

२१४. पाश्चात्त्यकाव्यशास्त्रम् - ज्ञानचन्द्र शास्त्री, प्रका० जयभारत साधुमहाविद्यालयः हरिद्वारम्, १९९२

२१५. एकावली- डा. सत्यव्रत शास्त्री

२१६. संक्षिप्तनाट्यशास्त्रम्-डा० राधावल्लभ त्रिपाठी

२१७. काव्यप्रकाशः (चण्डीदासकृतया दीपिकाटीकया विभूषितः) - सम्पादकः- आचार्य रामगोविन्द शुक्लः, वाराणसी (द्वितीय संस्करणम्) १९९१

२१८. श्री भरतमुनिप्रणीतं नाट्यशास्त्रम् सम्पा० डा० पारसनाथ द्विवेदी, सं० सं० वि० वि० वाराणसी, १९९२

२१९. भरतमुनि साहित्यशास्त्र के आदि आचार्य- डा० रमेश कुमार पाण्डेय, प्रका० २१८९ वत् १९९२.

२२०. भक्तिदर्शनविमर्शः - डा० गोविन्दचन्द्र पाण्डेयः, प्रका० २१८ वत् १९९१

२२१. पंचमी साहित्यविद्या- ले० प्र० बटोही झा, केन्द्रीयसंस्कृतविद्यापीठम्, लखनऊ

२२२. मेघदूतसंगीतपल्लवी - डा० सुषमा कुलश्रेष्ठ, प्रका. ईस्टर्न बुक लिंकर्स, दिल्ली-७, १९९०

२२३. ऋतुसंहारसंगीतसुरभिः- लेखिका प्रकाशकश्च २२२ वत्, १९९२

२२४. द्रष्ट०: 'देववाणी-सुवासः' पृ० ५.३४६-३७५

२२५. डा० अर्वाचीनसंस्कृतम् (१५/२) सम्पादकः डा० रमाकान्त शुक्लः, १५.४.१९९३ पृ०. १-२८

२२६. शिवराजविजय : (पंचमो निःश्वासः) प्रणेता- श्रीमदम्बिकादत्त व्यासः। प्रका० कृष्णकुमार व्यासः, व्यास पुस्तकालयः, डी १६/१४ सोमेश्वर गली, मानमन्दिर, काशी। चतुर्थ संस्करणम्, १९८१

२२७. उत्तरमंगलम् रमाकान्त शुक्लः अर्वाचीनसंस्कृतम् (१२/१) १५.१.१९९० पृ० ४.

संस्कृत-जगद्वार्ताः

१. **दिल्ली संस्कृत अकादमी** - समायोजितान्यनुष्ठानानि - १) त्रिदिवसीयमखिलभारतीयं संस्कृतसम्मेलनं महामहिमराष्ट्रपतिना डा० शंकरदयालशर्मणोद्घाटितम् (१०-१२.६.१९९३), २) संस्कृतच्छात्रवृत्तिसमारोहः १९९२-९३ (२२.४.१९९३), ३) द्विदिवसीयं वैदिकसम्मेलनम् (२४-२५.४.१९९३), ४) आदिशंकराचार्यजयन्ती (१.५.१९९३), ५) वेदेषु वनस्पतिविज्ञानम् ः परिचर्चा (२५.७.१९९३), ६) संस्कृतदिवससमारोहः (२.८.१९९३), ७) स्वतन्त्रतादिवसोपलक्ष्ये स्थानीय संस्कृतकविसम्मेलनम् (१४.८.१९९३), ८) डा० गोस्वामिगिरधारीलालशास्त्रिजयन्त्युपलक्ष्ये आयुर्वेदज्योतिषशास्त्रयोः पारस्परिकसम्बन्धः - इति विषयमवलम्ब्य डा० शुकदेवचतुर्वेदस्य भाषणम् (१९.८.१९९३)।

२. अ० भा० प्राच्यविद्यासम्मेलनस्य षट्त्रिंशत्तमाधिवेशनं पुणे इत्यत्र सम्पन्नम् (२८-३०.५.१९९३)।

३. **'देववाणी-सुवास'स्य प्रकाशन-वितरणोत्सवौ**ः डा० रमाकान्तशुक्लाभिनन्दनसमिते स्तत्त्वावधाने २९ - ५ - १९९३ तारिकायां पुण्यनगरे 'देववाणी-सुवास' स्य (डा० रमाकान्तशुक्लाभिनन्दनग्रन्थस्य) प्रकाशनोत्सवः सम्पन्नो यत्र प्रो० रामचन्द्रनारायणदाण्डेकरैः ग्रन्थोऽयं डा० शुक्लाय समर्पितः। अस्मिन्नवसरे पं० आद्याचरणझा - कुलपति - प्रो० वि० वेंकटाचल - डा० मण्डनमिश्र - डा० प्रभाकरनारायणकवठेकर - प्रो० एस० डी० जोशी - प्रो. अजहर - डा० अशोकचटर्जीशास्त्रि - प्रभृतिभिर्विद्वद्भिः स्वशुभकामनाः डा० शुक्लाय प्रदत्ताः। झामहाभागानामाध्यक्ष्ये एका कविगोष्ठी अप्यायोज्यत। स्वागतभाषणं 'शारदा' कारेण पं० वसन्तगाडगीळेन धन्यवादज्ञापनं च ग्रन्थसम्पादकेन अभिराज डा० राजेन्द्रमिश्रेण कृतम्।

दिल्ल्यां १२.६.१९९३ तारिकायां डा० मण्डनमिश्रस्याध्यक्ष्ये देववाणी - सुवासस्य वितरणोत्सवः समायोज्यत यत्र लेखकेषु ग्रन्थस्य वितरणं जातम् । अस्मिन्नवसरे डा० रामकरण शर्मा, प्रो० वि० वेंकटाचलम्, आचार्यश्रीनिवासरथः पं० वसन्तगाडगीळः, डा० गणेशदत्तशर्मा, डा० कृष्णकान्तशुक्लः, डा० राजेन्द्रमिश्रः डा० रामचन्द्रद्विवेदी, डा० प्रशान्त वेदालकारः, कविरत्नश्रीकृष्णसेमवाल इत्यादिभिरभिभाषितम् । उत्सवस्य संचालनं डा० रवीन्द्रनागरेण कृतम् ।

(आनन्दवर्धनः)

CHECKLIST TO BE EFFECTIVE FROM 15.10.1993

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

(अस्य सूच्यां क्रमशः ग्रन्थस्य क्रमसंख्या लेखकः/सम्पादकः, १५.१०.१९९३ तः प्रभावि रूप्यकेषु मूल्यं च दीयन्ते।)

२. **सुगमरामायणम्** (आचार्य रमेशचन्द्र शुक्लः)	Rs. 150.00
५. **श्रीकृष्णचरितम्** (आचार्य रमेशचन्द्र शुक्लः)	Rs. 150.00
१३. **भारतस्वातन्त्र्यसंग्रामेतिहासः** (आचार्य डा० रमेशचन्द्र शुक्लः)	Rs. 150.00
१९. **कालिदास की कला और संस्कृति (II)** (डा० देवीदत्त शर्मा)	Rs. 150.00
२३. **राधाकृष्णरसायनम्** (पं० ओट्टूर उण्णि नम्बूदिरीपादः)	Rs. 150.00
२८. **स्फूर्तिसप्तशती** (डा० शिवदत्त शर्मा चतुर्वेदी)	Rs. 150.00
२९. **साहित्यकौतुकम्** (प० टी० वी० परमेश्वर अय्यरः)	Rs. 150.00
३१. **संस्कृत साहित्य में राष्ट्रिय भावना (I)** (डा० हरिनारायण दीक्षितः)	Rs. 150.00
३२. **श्रीबदरीशसुप्रभातम्** (डा० सी० आर० स्वामिनाथन्)	Rs. 150.00
३५. **संस्कृत साहित्य में राष्ट्रिय भावना (II)** (डा० हरिनारायण दीक्षितः)	Rs. 150.00
३६. **संस्कृत साहित्य में राष्ट्रिय भावना (III)** (डा० हरिनारायण दीक्षितः)	Rs. 150.00
४२. **पुरश्चरणकमलम् (डा० रमाकान्त शुक्लः)**	Rs. 10.00
४४. **रसदर्शनम् (द्वितीयसंस्करणम्)** (डा० रमेशचन्द्र शुक्लः)	Rs. 150.00
४५. **संस्कृत साहित्य में राष्ट्रिय भावना (सम्पूर्ण)** (डा० हरिनारायण दीक्षितः)	Rs. 300.00
४६. **आराधना** (डा० मण्डन मिश्रः)	Rs. 10.00
४७. **भाति मौरीशसम्** (डा० रमाकान्त शुक्लः)	Rs. 10.00
४९. **कूहा** (डा० उमाकान्त शुक्लः)	Rs. 60.00
५०. **पण्डितराजीयम्** (डा० रमाकान्त शुक्लः)	Rs. 60.00
५२. **अभिशापम्** (डा० रमाकान्त शुक्लः)	Rs. 60.00
५३. **सारस्वतसमुन्मेषः** (डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः')	Rs. 60.00
५९. **अध्यात्मरामायण में अध्यात्मचिन्तन** (पं० त्रिगुणानन्द शुक्ल)	Rs. 150.00
६२. **संस्कृतसेवकः स्वामिनाथः** (डा० रमाकान्त शुक्लः)	Rs. 150.00
६४. **लक्ष्मीशतकम्** (डा० वरदाचार्य कृष्णन्)	Rs. 60.00
६५. **ऋतम्** (डा० केशवचन्द्र दाशः)	Rs. 60.00
७२. **श्रीगान्धिचरितम्** (प्रो० चारुदेव शास्त्री)	Rs. 150.00
७४. **दूतप्रतिवचनम्** (डा० इच्छाराम द्विवेदी 'प्रणवः')	Rs. 60.00
७५. **भाति मे भारतम् (तृतीयसंस्करणं)** (डा० रमाकान्त शुक्लः)	Rs. 18.00
७६. **अर्वाचीनसंस्कृतसाहित्यपरिचयः (II)** (सं० डा० रमाकान्त शुक्लः)	Rs. 150.00
७७. **'अर्वाचीनसंस्कृत' संग्रहः (I)** (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
७८. **'अर्वाचीनसंस्कृत' संग्रहः (II)** (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
७९. **'अर्वाचीनसंस्कृत' संग्रहः (III)** (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
८१. **नाट्यसप्तकम्** (डा० रमाकान्त शुक्लः)	Rs. 200.00
८२. **जय भारतभूमे (द्वितीयसंस्क०)** (डा० रमाकान्त शुक्लः)	Rs. 30.00
८३. **श्रीहनूमत्पञ्चाशत् तथा शरणागतिषोडशी** (श्री० सुन्दरराजः)	Rs. 10.00
८४. **भारतजनताहम् (कवितासंग्रहः)** (डा० रमाकान्त शुक्लः) (यन्त्रस्थः)	Rs. 200.00
८५. **सत्प्रेरणा (नाटकम्)** (डा० इच्छाराम द्विवेदी 'प्रणवः') (यन्त्रस्थम्)	Rs. 250.00

प्रकाशिका **देववाणी-परिषद्, दिल्ली, आर-6 वाणी विहारः, नयी दिल्ली-110059**

DEVAVANI PARISHAD, DELHI
R-6, VANI VIHAR, NEW DELHI-110059 (INDIA) (PHONE: 5553499)


आज़ादी
हमारा कवच
एकता हमारी शक्ति
हम हैं एक राष्ट्र एक प्राण
हम हैं भारतीय

दिल्ली संस्कृत अकादम्याः १९९२-९३

सत्रे समायोजितानां कार्यक्रमाणां विवरणम्

(१) सम्मेलनानि १. अखिलभारतीयसंस्कृतकविसम्मेलनम् २. अखिल भारतीयत्रिदिवसीयसंस्कृतपत्रकारितासम्मेलनम् ३. स्थानीयसंस्कृतकविसम्मेलनम् **(२) संगोष्ठ्यः** ४. शंकराचार्यस्य साहित्यं जीवनमूल्यानि च ५. संस्कृतसाहित्ये कृषिविज्ञानम् ६. भाषासाहित्ययोः दृष्ट्या संस्कृतपञ्जाबीभाषयोरनन्तसम्बन्धः ७. वाल्मीकिरामायणे स्त्रीणां स्थानम् ८. पण्डितराजजगन्नाथस्यसाहित्ये लोकचिन्तनम् ९. संस्कृतशिक्षकसंगोष्ठी १०. जैनदर्शने राष्ट्रैक्यम् ११. वेदेषु पर्यावरणम् **(३) परिचर्चे** १२. महाभारतकाले शिक्षणव्यवस्था १३. ज्यौतिषशास्त्रस्याधारे वृष्टिविज्ञानम् **(४) परिसंवादौ** १३. प्राचीनविधिशास्त्रे दण्डप्रक्रिया १४. भारतीयास्मिता जातिव्यवस्था च, **(५) अध्ययनाध्यापनकार्यक्रमौ** १६. पुनर्वासवस्ती-ख्यालाग्रामे संस्कृताध्ययनकेन्द्रस्थापना. १७. फैजरोड़स्थदुर्गामन्दिरे संस्कृताध्ययनकेन्द्रस्थापना **(६) संस्कृतलेखकसहयोगः** १८. डॉ० सत्यव्रतशास्त्रिप्रणीतग्रन्थायार्थिकसहयोगः १९. डॉ० कृष्णदत्तभारद्वाज प्रणीतग्रन्थायार्थिकसहयोगः **(७) प्रकाशनानि** २०. महाबुद्धवत्थुनाम्नः ग्रन्थस्य द्वितीयतृतीयभागयोः प्रकाशनम् २१. संस्कृतमञ्जरी पत्रिका प्रकाशनम् २२. अकादम्याः विवरणपराया वार्षिक्याः प्रकाशनम् **(८) संस्कृतस्तोत्र-काव्य-टेपयोजना** २३. मेघदूतस्य संगीतात्मकं ध्वनिकरणम् (यन्त्रस्थं) २४. सौन्दर्यलहर्या ध्वन्यंकनं विचाराधीनम् **(९) जयन्त्यः** २५. शकंराचार्यजयन्ती २६ वेदव्यासजयन्ती २७. वाल्मीकिजयन्ती २८ पण्डितराजजगन्नाथजयन्ती २९ डॉ० गोस्वामिगिरधारीलालजयन्ती **(१०) प्रतियोगिताः** ३०. स्नातक-स्नातकोत्तरस्तरीया श्लोकान्त्याक्षरीप्रतियोगिता ३१. मध्यमास्तरीया श्लोकान्त्याक्षरीप्रतियोगिता ३२. विद्यालयस्तरीया श्लोकोच्चारणप्रतियोगिता ३३ महाविद्यालयस्तरीया श्लोकसंगीतप्रतियोगिता ३४. विद्यालयस्तरीया श्लोकसंगीतप्रतियोगिता ३५. स्नातकस्नातकोत्तरस्तरीया संस्कृतभाषणप्रतियोगिता ३६. मध्यमास्तरीया संस्कृतभाषणप्रतियोगिता ३७. विद्यालयस्तरीया संस्कृतभाषणप्रतियोगिता ३८. महाविद्यालयस्तरीया संस्कृतनाटकप्रतियोगिता ३९. विद्यालयस्तरीया संस्कृतनाटकप्रतियोगिता ४०. विद्यालयस्तरीया एकलश्लोकसंगीतप्रतियोगिता ४१. महाविद्यालयस्तरीया एकलश्लोकसंगीतप्रतियोगिता ४२. संस्कृतविद्यालयस्तरीया एकलश्लोकसंगीतप्रतियोगिता **(११) सम्मानकार्यक्रमाः** ४३. संस्कृतसाहित्यसेवासम्मानः ४४. विद्यालयसंस्कृतसेवासम्मानः ४५. अकादमीसहयोगिसम्मानः ४६ महाविद्यालयीयसंस्कृतसेवासम्मानः **(१२) पुरस्काराः** ४७. संस्कृतप्रतिभापुरस्कारः ४८. संस्कृतशिक्षकपुरस्कारः ४९. अखिलभारतीयसंस्कृतमौलिकसाहित्यरचनापुरस्कारः (विचाराधीनः) **(१३) समारोहाः** ५०. महाबुद्धवत्थुग्रन्थार्पणसमारोहः ५१. अकादम्या आर्थिकसहयोगेन प्रकाशितानां ग्रन्थानां लोकार्पणम् ५२. अकादमीमाध्यमेन ध्वन्यंकितानां स्तोत्राणां लोकार्पणम् ५३. संस्कृतशिक्षकपुरस्कारसमारोहः ५४. संस्कृतदिवससमारोहः ५५. प्रतियोगिता पुरस्कारवितरणसमारोहः **(१४) टेलीफिल्मयोजना** (५६) आजादचन्द्रशेखरस्य व्यक्तित्वमवलम्ब्य प्रस्ताविता टेलीफिल्म् योजना (विचाराधीना) **(१५) संस्कृत पत्र-पत्रिकाणां सहयोगः** संस्कृत पत्र-पत्रिकाणां कृते विज्ञापनमाध्यमेनार्थिकसहयोगः प्रदीयते। **(१६) पुस्तकालयस्थापना (१७) छात्रवृत्तिः** ।

पहले बच्चे का
अधिकार
तीन साल तक
पूरा प्यार
माला-डी अपनाइए
माला-डी
Mala-D
गर्भ निरोधक गोलियां
दो रुपये प्रति पैकेट
सिर्फ़ एक गोली रोज

davp 93/250

अर्वाचीनसंस्कृतम्

(R. N. 34554/79)

अर्वाचीनसंस्कृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	२०००-०० प्रतिपृष्ठम्
अन्यपृष्ठानाम्	१०००-०० प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	५००-००

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१९९३ तः प्रभावि)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू एस० डालरा: 10
आजीवनं (भारते) रु० 400.00
आजीवनं (विदेशेषु) यू० एस० डालरा: 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 30.00
वार्षिकं (विदेशेषु) यू० एस० डालरा: 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालरा: 100

डाकव्ययः : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 30.00
विदेशेषु : यू० एस० डालरा: 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पञ्जीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheenasanskritam/*Arvācīnasaṃskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M.O) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

'देववाणी-परिषद्, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९'इति मुद्रणालये मुद्रापयित्वा 'आर-६ वाणी विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१५/३)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः [redacted]
अस्यांकस्य मूल्यम् रु० १०.०० Rs. 10.00 तिथि : ३१.८.१९९३